In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (ii) - 23

"उभयभाषासनाथ"

द्विभाषि सोमनाथशास्त्रिप्रणीता

॥ श्रीराजरत्नमालाचम्पूः ॥

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादकः

जोषि भरद्वाजः

परियोजना – अनुसन्धाता

डा. के. वि. सूर्यप्रकाशः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy
संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (ii) - 23

"उभयभाषासनाथ"

द्विभाषि सोमनाथशास्त्रिप्रणीता

॥ श्रीराजरत्नमालाचम्पूः ॥

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादकः

जोषि भरद्वाजः

परियोजना – अनुसन्धाता

डा. के. वि. सूर्यप्रकाशः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii)- 23

Śrī Rājaratnamālācampūḥ

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Śrī Rājaratnamālācampūḥ

ISBN – 978-81-969575-9-9

© Sanskrit Academy

Year : 2024
Pages : xxi+110
Copies : 300
Price : ₹ 300

In Public domain. Digitization Muthulakshmi Research Academy
Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii)- 23

ŚRĪ RĀJARATNAMĀLĀCAMPŪḤ

by

"Ubhayabhāṣāsanātha"

Dvibhāṣi Somanātha Śāstri

(Published under 'Re-printing of rare books project', Ashtadashi scheme of Central Sanskrit University, New Delhi)

Chief-Editor

Prof. K. Neelakantham

Director

Editor

Joshi Bharadwaj

Project Investigator

Dr. K. V. Suryaprakash

Sanskrit Academy

Adarsha Shodha Sanstha

(Recognised by Central Sanskrit University, New Delhi)

Osmania University, Hyderabad – 500 007

2024

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 23

Śrī Rājaratnamālācampūḥ

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Śrī Rājaratnamālācampūḥ

ISBN – 978-81-969575-9-9

© Sanskrit Academy

Year	:	2024
Pages	:	xxi+110
Copies	:	300
Price	:	₹ 300

In Public domain. Digitization Muthulakshmi Research Academy

Foreword

ओम् श्री गुरुभ्यो नमः

॥ श्री शङ्करभगवत्पादाः विजयन्ते॥

Campūkāvya is one of the appealing varieties among the śravyakāvya of Sanskrit literature. The system of Campūkāvya is seen in the Vedik literature, Puranas and even in Inscriptions. The rhetoricians of Sanskrit from Bhamaha of 5th century A. D. to Vidyanatha of 14th century A.D. almost all have defined Campūkāvya गद्यपद्योभयमयं चम्पूरित्यभिधीयते in their works on poetics. Bhojaraja, Sharabhojikavi and some other poets of Campūkāvyas have defined beautifully its merit in the beginning of their works.

The first Campūkāvya is said to have been the Nalacampu of Trivikrama Bhatta of 9th century A.D. It is composed in seven Ucchvāsas i.e. Chapters. According to the History of Sanskrit literature 300 Campūkāvyas have been edited and published till now and hundreds of unpublished Campū works are there in the Manuscript libraries in India and abroad. According to the History of classical Sanskrit literature, the contribution of poets from south India is higher than the composition of Campūkāvyas of other parts of India in Sanskrit.

We, from Sanskrit Academy, have published nine Campūkāvyas that were composed by poets of Telangana and Andhrapradesh and now bringing out one more beautiful Campūkāvya Rājaratnamālācampū authored by veteran scholar and poet **Dvibhashi Somanatha Shastry.**

Most of these Campūkāvyas which are published by us were in old Telugu script and hence the beauty and greatness of these wonderful kavyas have not reached to Sanskrit world of the other parts of Bharatadesha. Hence, we are trying to publish these rare Campūkāvyas in Devanagari script with an introduction in Sanskrit and English with the critical observations under the reprinting

In Public domain. Digitization Muthulakshmi Research Academy

of rare books of Aṣṭādaśī scheme sanctioned by Central Sanskrit University, New Delhi.

Rājaratnamālācampū:

Rājaratnamālācampū was composed by Dvibhashi Somanatha Shastry. It was published in 1968 from Anantapur of Andhrapradesh. Though it was in Devanagari Script, not known much to the Sanskrit scholars. Poet Dvibhāṣi Somanatha Shastry followed the tradition of great ancient authors like Valmiki, Vyasa, Bhasa, Kalidasa, Bharavi, Bhavabhuti, who had composed tremendous works only for the welfare of the world[1] but not for gaining wealth.

Rājaratnamālācampū was divided in to nine chapters called as *Ratnams*. The Ancient authors have used the words like adhyāya, ucchvāsa, ullāsa, vilāsa, stabaka and kāṇḍa in their campū works. Here Dvibhāṣi Somanatha Shastry has named the chapters as **Ratnams** in this champukavya[2]. He has described the story of 30 kings of **śātavāhana** (śālivāhana) dynasty who ruled Andhra-desha for several years. Many puranas have the description of these kings but Sri Somanatha Shastry has followed the lineage that is mentioned in Matsyapurana[3]. The poet has elaborately and beautifully described their rule, generosity, merits, honouring of well-versed scholars and poets, their uninterrupted service to the society, continuous performance of religious rights for the welfare of kingdom etc. The poet must have named the chapters as *Ratnams* as he was describing the wonderful characteristics of kings of Śātavāhana dynasty.

---

[1] विश्वश्रेयः काव्यम्

[2] सम्पूर्णविषया राज्ञां चम्पूरूपान्ध्रभूभुवाम्।
रत्नमालाभिधानेन नूत्नमारभ्यते कृतिः (राजरत्नमालाचम्पूः 1-10)

[3] Please see the list of all the kings is given in Sanskrit introduction by Joshi Bharadwaj.

In Public domain. Digitization Muthulakshmi Research Academy

The Poet -Dvibhāṣi Somanatha Shastry:

"Ubhayabhāṣāpravīṇa Kavirāja Vaidyavidvān Kavikaṇṭhīrava Vidvatkavibhūṣaṇa" Dvibhāṣi Somanatha Shastry was born in the month of June 1918 (as per Telugu Calander kāḷayukti, uttarāyaṇaṃ jyeṣṭhamāsaṃ) in the Village Tammanavaram near Kakinada in Andhrapradesh. His parents were Sri Bāpanārya and Smt Venkataratnamambika[4]. Sri Somanatha Shastry learnt shastras under his maternal grandfather Sri Kakaraparti Venkataraya Maneeshi and his son Kakaraparti Krishna Shastry. Sri Kakaraparti Krishna Shastry was a great scholar and he was honoured with the titles like *Kavimūrdhanya, Prauḍhakavicandra.* He taught all shastras to Sri Somanatha Shastry. Sri Somanatha Shastry has learnt Vyakarana shastra from Sri Podili Lakshminarayana Shastry. Apart from learning many shastras, this poet has become an expert in Ayurveda under the training of his revered father and went to Bapatla, a town near Guntur to serve the people as a doctor of Ayurveda.

Sri Somanatha Shastry served as Telugu Pandit for several years in East Godawari and Anantapur districts of Andhrapradesh. He was a devoted teacher. To keep up the tradition set up by his father Bāpanārya and forefathers he served the society as an Ayurveda physician. He was an example for the great saying परोपकाराय सतां विभूतयः. On the other side, Sri Shastry went on writing many Kavyas in Sanskrit and Telugu. His compositions are:

1. Kṛṣṇagānasravantī,
2. Mālatīmañjarī,
3. Rājaratnamālācampū

} Sanskrit

---

[4] पुत्रो वेङ्कटरत्न वाप सुधियोर्यस्तेन यत्नान्मया ।।।-9

In Public domain. Digitization Muthulakshmi Research Academy

4. Kumudvatipariṇayam,
5. Madirāvatīvilāsamu,
6. Rājarājeśvarī śatakamu,
7. Ekāvalī
8. Mādhavaśrīvidyāraṇyamu

— Telugu

9. Bhāvabodhinī - Telugu commentary on Sadāmuktisudhārṇava a book on Advaitavedanta composed by Sri Kakajaparti Krishna Shastry.
10. Dhanvantaridandakamu: in praise of Lord Dhanvantari

After retirement from the teacher post, Sri Shastry continued his *sārasvatasevā*, taught Sanskrit and Telugu to all who ever approached him. His name was appeared in the list of great scholars and poets in the world which was done by a group of experts in research. While Sri Sri Sri Bharati Teertha mahaswamy of Sringeri was seen at the number 101, Sri Shastry's name appeared at 109,[5] indeed it's a great honour for a scholarly poet.

Sri Somanatha Shastry followed the path of his parents and his forefathers and also the famous sayings लोकहितं मम करणीयम्, परोपकारार्थमिदं शरीरम् etc and helped the people in need throughout his life and passed away on 19-09-1993[6] (Srimukha samvatsara, Dkshinayana, nijabhadra pada, shuklapaksha, Chaturthi)

Rājaratnamālācampū - Poetic excellence:

Rājaratnamālācampū is a rare historical campūkāvya composed on the history of śātavāhana dynasty of Andhradesha. Many of the poets have composed historical kavyas in Sanskrit. Starting from

---

[5] Sri Krishna Ganasravanti Introducion by Smt Somajyotsna- page 23

[6] जयन्ति ते सुकृतिनः रससिध्दाः कवीश्वराः
नास्ति तेषां यशःकाये जरामरणजं भयम्।।

In Public domain. Digitization Muthulakshmi Research Academy

Bilhana's Vikramāṅkadeva caritam to Ogeti Parikshit Sharma's Srīmatpratāpa rāṇāyaṇam hundreds of mahakavyas and laghukavyas have been composed in Sanskrit. Rājaratnamālācampū is the second campūkāvya after the jānarājacampūḥ of Krishnadattakavi in the literature of campūkāvya. Krishnadattakavi has described the history of the kings of Bhosla dynasty of Nagapur in Maharashtra. This kavya is said to have been composed in 18th century A. D. here the poet has narrated the story of only five kings belonging to Bhosla dynasty. And the Krishnadatta said very clearly in the beginning of his Kāvya that he was greatly honoured by the king Janaraja and hence he composed that Kavya on the life history of that king. But this Dvibhashi Somanatha shastry a versatile scholar of various shastras and puranas, has described the history of the thirty kings belonging to Śātavāhana dynasty in this campūkāvya[7]. He said that the poets must compose kavyas on the history of the kings which would help the coming generations to know the greatness of those who fought for the well-being of *mātṛdeśa*[8]. According to history *Sreemukha* was the first king of Śātavāhanas. Somanatha shastry also started with the paise of Sreemukha in this Kavya. And first Sri Śātakarṇi who married *Naganeeka* the daughter of King of Marathaas, ruled the Andhra kingdom for hundred years. He has performed Ashvamedha yāga[9] śatātirātra, āptoryāma, gavāmayana and many other yajnas[10] for the welfare of the Kingdome. After him the second Śātakarṇi (fifth among 30) was great warrior and he won over the Kalingas and Magadhas in battle and brought them under the control of Andhradesha. He has ruled the kingdom for 56 years.[11]

---

7 सम्पूर्णविषया राज्ञां चम्पूरूपान्ध्रभूभुवाम्। रत्नमालाभिधानेन नूत्नमारभ्यते कृतिः।।

8 I-6

9 पितुराचरितं सदानुकार्यं हयमेधं कृतवानयं द्विकृत्यः॥ राज-चम्पू I-100

10 Ibid I-102

11 एवं षडुत्तरगतं प्रशशास राज्यं पञ्चाशदब्दसमयं स महामहीन्द्रः॥ ibid III -81

In Public domain. Digitization Muthulakshmi Research Academy

Sri Somantha shastry described the rule of Kuntala Śātakarṇi in fourth chapter. "The famous story of Śātavāhana who does not know Sanskrit, gets Modakas= Laddus for his beloved queen, not understanding the meaning of her words मोदकैस्ताडय[12] while enjoying *Jalakrida* in a beautiful pond. Later śarvavarma challenges and says that he would teach Sanskrit to the king and make him fluent in Sanskrit within six months. Guṇāḍhya another poet scholar does not agree with this and he says that it is simply impossible to make the king fluent in the said time[13]. He also tells that if the king was made fluent in the said time, he would leave the kingdom and go to the forest". The poet has drawn this story beautifully in this fourth chapter.

Then comes Hāla Chakravarti[14] who was well renowned scholar, poet and ruler. Sri Somanatha Shastry has depicted beautifully the story of Hala in the fifth chapter. His marriage with Leelavati, his marching against enemies, meeting with celestial women to know the greatness of Leelavati are some of the important incidents are described here in simple Sanskrit language.

After Hala, another well-known king was Gautamīputraśātakarṇi 22nd king in Śātavāhana dynasty. He was a great scholar, poet, virtuous and warrior[15]. He too, has performed Rājasūya, Aśvamedha, Vājapeya cayaneṣṭi and other sacrifices. Sri Somanatha Shastry compared him with Bhagiratha, Rantideva, Raghu-maharaja and Yayati in magnanimity and generosity.[16]

At the end of this Kavya, Somanatha shastry has said that the Śātavāhana kings have ruled over the Andhradesha for 365 years[17].

---

[12] नृप म परिताडयोदकैरिति वक्तुं चतुरोक्तिलीलया। ibid IV-34
[13] Ibid IV- 58 to 67
[14] Ibid V-5
[15] Ibid VI-85
[16] Ibid VI-17,18
[17] Ibid IX -43

In Public domain. Digitization Muthulakshmi Research Academy

Prayer - Special feature of the Kavya:

While defining Kavya/mahakavya, Bhamaha, Dandi, Vishwanatha and others have said clearly that a Kavya must begin with a prayer to the god or with the intimation of the theme of the Kavya[18]. All the poets from ancient times have followed it strictly and authored many Sravya and Drishya kavyas. Here, Dvibhashi Somanatha shastry, too followed this tradition and started his Rājaratnamālā campū with a mangalashloka. The important point to note here is that this poet has prārthanāśloka at the beginning of every chapter[19] and also a salutation śloka[20] at the end of every chapter. He was the devotee of goddess Kameshwari and always prayed her at every place. Here he reminds the famous saying[21] मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाऽध्येतारश्च मङ्गलयुक्ता यथा स्युरिति।

Andhradesha and Godavari:

Poets generally describe the cities, rivers, ponds, gardens of that Desha to which they belong to. Here Somantha kavi who was from Andhradesha, tried well to describe the pride of Andhradesha[22], river Godavari, Manjeera and some other places too on many occasions in this kavya.

Alankaras and Chandas:

Alankaras are most important for a Kavya. We see beautiful almkaras in the ancient Mahakavyas and drishyakavyas which delight the readers at every sloka. Sri Somanatha shastry who attained good command over Sāhityashastra in the childhood itself, has shown his brilliance in this Kavya. He has many alamkaras like

---

[18] आदौ नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्।।

[19] I-1

[20] I- 104

[21] Patanjali's Mahabhashyam paspaśāhnikam

[22] आन्ध्रेशे स्फुरति ततश्च शातकर्णौ आन्ध्रत्वे दिशि दिशि पुष्पिते यशोभिः।
आन्ध्राणां मृदुमधुरैकमञ्जुवाणी मञ्जीरघ्निभिरुदञ्चिते दिगन्ते ।। III -3

In Public domain. Digitization Muthulakshmi Research Academy

Upama, Rupaka, Sandeha, Utpreksha, Drishtanta, Virodha, Arthantaranyasa ets. Kalidasa is seen in his Upamalamkara, Bharavi in Arthantaranyasa, Banabhatta in Utpreksha, Rupaka, and Trivikramabhatta in Slesha.

He has composed shlokas in all famous meters like Indravajra, Upendravajra, Vasantatilaka, Shikharini, Shardula vikriditam, Sragdhara and others.

And much has to be discussed if we are to explain about the beauty of the style of this Kāvya. The prose in this Kavya is in no way less poesy than the verses. Vaidarbhī rīti is seen in his verses and Gauḍī is seen in the prose parts. Poet Somanatha Shastry himself has said: -

विमलगाङ्गतरङ्गशुचिस्मितः रुचिरशोणरसस्फुरिताधरा।
कृतिविधौ वितनोतु रसोत्तमा रसवतीं सुमतिं मम भारती।।
तनोत्वियं मे कृतिमान्ध्रमेदिनी विनूत्नमाधुर्यरसप्रसादिनीम्[23] ॥

We hope this beautiful Kāvya Rājaratnamālācampū would delight the Sahridyas and researchers will concentrate on it for their research. A thorough research could be made on this with the comparison of History of Śātavāhana kings.

I appreciate young scholar Mr Joshi Bharadwaj who made a thorough study of this Kāvya with historical views of Śātavāhana kings. His sincere efforts for making this book ready for publication are praise worthy. I congratulate Mr Joshi Bharadwaj and wish him all success in all his endeavours.

I thank my deputy directors Dr V. Subrahmanyam (who is on deputation in Pune) and Dr K. Varalakshmi for their faithful service in research and publications of academy. I congratulate Dr K. V. Suryaprakash senior research assistant and in charge of project of reprinting of rare books. He has readily agreed to publish this book under the reprinting of rare books and took every care to

---

[23] Ibid I-4, 5.

In Public domain. Digitization Muthulakshmi Research Academy

get it published. I thank Dr Joshi Santosh Kumar another research assistant for his continuous help in the publications of Academy.

I thank Prof. Srinivasa Varkhedi Honorable Vice Chancellor and Prof. Gayatri Muralikrishna Registrar Central Sanskrit University, New Delhi for their encouragement and for sanctioning such projects to Sanskrit Academy. I thank our Hon'ble Chairman Prof. D. Ravinder V. C. and Prof. P. Lakshminarayana Registrar of Osmania University for their amicable support for the development of Sanskrit Academy. I thank Prof. Madhukeshwar Bhat Director, Aadharsh Institutions in CSU Delhi.

I thank Karshak Art Printers Vidyanagar, Hyderabad for printing this book on time.

सुधीजनविधेयः

Prof. K. Neelakantham

Director

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तावना

कविपरिचयः-

बहुमुखप्रज्ञाशाली, विविधेषु शास्त्रेषु निष्णातः, आयुर्वेदशास्त्रधुरीणः, महान् कविः ब्रह्मश्री द्विभाषि सोमनाथ शास्त्रीवर्याः आन्ध्रप्रदेशस्य काकिनाड इत्याख्य-जनपदस्य समीपस्थे **तम्मनवरम्** इति ग्रामनिवासी आसीत्। श्रीमतोः द्विभाषि वेङ्कटरत्नामाम्बिका-भावनार्ययोः कुलदीपकोऽयं महानुभावः 1918 तमे वर्षे स्वजनिं लेभे। आन्ध्रदेशे व्याकरणशास्त्रविद्वत्सु प्रथितयशसां श्रीमतां ताता सुब्बरायशास्त्रिवर्याणां शिष्याः श्री लक्ष्मीनारायण शास्त्रिणः। एतेषां सकाशे सोमनाथ शास्त्रिवर्यः व्याकरणशास्त्रम् अध्यगीष्ट। मातामहानां काकपर्ति वेङ्कटराय मनीषि महाशयानां सकाशात् काव्य-नाटक-साहित्यादीनि, पितृचरणेभ्यः आयुर्वेदशास्त्रं चाधीतवान्। यद्यपि शास्त्राण्यान्यानि आभ्यस्यत् तथापि आयुर्वेदवैद्यविधानेन समाजस्य सेवाम् अकरोदयं विद्वदग्रणीः। मध्ये कदाचित् कुटुम्बपोषणार्थं अध्यापकपदं निरवहत्। ततः 1961 तमे वर्षे वैद्यशास्त्रे अस्य निपुणतां, समाजसेवातत्परतां च श्रुत्वा अनन्तपुर इत्याख्ये जनपदे चिकित्सकरूपेण तत्रत्याः आहूतवन्तः। तत्र वैद्यवृत्तिं निर्वहन् अन्यत्र पाठशालायाम् अध्यापकपदं प्राप्नोत् अयं सोमनाथशर्मा महोदयः[24]।

काव्यरचना

द्विभाषि सोमनाथ शास्त्रीवर्याः (1) धन्वन्तरिदण्डकम् (2) कुमुद्वती-परिणयः (3) मदिरावतीविलापः (4) राजराजेश्वरीशतकम् (5) मालतीमञ्जरी, (6) श्रीराजरत्नमालाचम्पूः (7) एकावलीकल्याणम् (8) श्रीकृष्णगानस्रवन्ति इत्यादिनैकानि काव्यानि तेलुगु भाषया संस्कृतभाषया चारचयन्। वृद्धाप्ये कदाचित् यद्यप्यन्धत्वम् अवाप्नुवन् तथापि दुहितृणां सहायेन काव्यानि निबबन्धुरेते इति ज्ञायते[25]।

---

[24] श्रीकृष्णानस्रवन्ति-पृ. सं10

[25] तत्रैव 11

In Public domain. Digitization Muthulakshmi Research Academy

चम्पूकाव्यवैशिष्ट्यम्

गद्यपद्यमयं श्रव्यं सम्बन्धं बहुवर्णितम्।
सालङ्कृतै रसैस्सिक्तं चम्पूकाव्यमुदाहृतम्।

अर्थात् गद्यपद्यमिश्रितं, श्रव्यं, वर्णनप्रधानम्, अलङ्कारबहुलं, सरसं, प्रबन्धकाव्यम् एव चम्पूकाव्यत्वेन परिगण्यते। प्राचीनादेव कालात् काव्यप्रकारोऽयं बहुशः प्रचलितः सम्मानितश्च दृश्यते काव्यरचनाप्रपञ्चे। अपि च चम्पूकाव्येषु सामान्यकथनं तु गद्येनैव कथ्यते किन्तु विशेषकथनाय पद्यमाश्रियते इति नलचम्पूः, रामायणचम्पूः, भारतचम्पूः इत्यादीनां ऋषितुल्यैः कविभिः रचितानां चम्पूकाव्यानाम् अध्ययनेनावगम्यते। यथा महाकाव्यस्य विषये नैकानि लक्षणानि प्रतिपादितानि लाक्षणिकैः बहुभिः नैकेषु ग्रन्थेषु तथा चम्पूकाव्यस्य संरचनाविषये लक्षणानि विशेषेण न प्रतिपादितानि। किन्तु चम्पूकाव्यरचयितारः सर्वेऽपि **नगरारण्वशैलर्तु** इत्यादि लक्षणान्यनुसृत्यैव स्वकाव्यानि निबबन्धुः। चम्पूकाव्यस्य विभजनविषये द्वादश-शताब्दस्य जैनमतानुयायी हेमचन्द्रसूरिः काव्यविद् काव्यानुशासनाख्ये ग्रन्थे उदलिखत् यत्, अङ्कः तथा उच्छ्वासः च चम्प्वाः अभिन्नाङ्गे स्तः इति[26]। परन्तु कतिपयेषु चम्पूकाव्येषु अङ्कोच्छ्वासयोः अपेक्षया विभाजकत्वेन अध्यायः, काण्डः, विलास इत्यादिपदानाम् उपयोगः प्राप्यते। अतः एतावता चम्पूकाव्यस्य कापि स्थिरपरिभाषा न प्राप्यते इति वक्तुं शक्यते।

श्रीराजरत्नमालाचम्पूः

सुहासिनी शुभ्रजलेजवासिनी सरोजिनी सारगुणैकभाजनी।
अतन्द्रिणी मय्यवधीन्द्रनन्दिनी करोत्विदानीं कुशलं कृपाधुनी॥

सम्पूर्णविषया राज्ञां चम्पूरूपान्ध्रभूभुवाम्।
रत्नमालाभिधानेन नूत्नमारभ्यते कृतिः[27]॥

---

[26] काव्यानुशासनम् पृ सं 408
[27] (राजरत्नमालाचम्पूः 1-2, 10)

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमान् द्विभाषि सोमनाथ कविः श्री राजरत्नमालाचम्पूर्नाम्ना ऐतिहासिकं काव्यं व्यरचयत्[28]। काव्यमिदं सः रत्नम् इति नाम्ना विभज्य नवसु रत्नेषु आन्ध्रदेशे प्रसिद्धानां शालिवाहनराज्ञां चरितम् अवर्णयत्। पूर्वेषां परिपालकानां राज्ञां चरितं यदि काव्येषूपनिबद्धं न भवति तर्हि लोकः तान् विस्मरति। अतः कविपुङ्गवाः इतिहासकाराः तेषां राज्ञां चरितमुपवर्ण्य लोकोपकार्यं कुर्युरिति सः अब्रवीत्[29]। शालि(शात)वाहनवंशे प्रायः त्रिंशत् पालकानां चरितम् आन्ध्रदेशस्य इतिहासग्रन्थेषु दृश्यते। वंशस्य आद्यः आसीत् श्रीमुखः[30]। ततः प्रथमः शातकर्णिः मराठा देशपालकस्य त्रणकैयरो इत्याख्यस्य **नागानीकां** नाम्नीं पुत्रीं परिणिनाय[31]। शत्रून् सर्वान् विजित्य स्वसाम्राज्यं विस्तारयामास । अयम् अश्वमेधयागम् अकार्षीत् इति शासनानाम् आधारेण ज्ञायते। ततः द्वितीयः शातकर्णिः दीर्घकालपर्यन्तं प्रायः 56 वर्षाणि यावत् राज्यं पालयामासेति इतिहासः कथयति। तदनन्तरं गौतमीपुत्रशातकर्णिः एतेषां वंशे अत्यन्तं प्रसिद्धः। अयमपि बहुकालं यावत् राज्यं शशास। अस्यापि चरितं शासनेषूपलभ्यते। ततः यज्ञश्री शातकर्णिः तदनन्तरं च चक्रवर्ती हालः अत्यन्तं प्रसिद्धौ। हालस्तु महान् कविः आसीदिति लोकविदितमेव। अयन्तु कविवत्सल इति बिरुदेन प्रसिद्धिं गतः। अस्मिन् वंशे अन्तिमः त्रिंशत्तमः राजा आसीदीति तृतीयः चन्द्रश्री पुलोमावि। एनं जित्वा इक्ष्वाकुवंशीयः शान्तिमूलो नाम राजा पर्यपालयदिति ज्ञायते।

मत्स्यपुराणस्याधारेण शालिवाहनवंशीयानां राज्ञाम् अनुक्रमः एवमस्ति –

---

[28] ब्रह्मज्ञानसुधाब्धिमन्दरगिरिर्येषां महोपज्ञता
जाताऽऽसन्निह वालखिल्यमुनयो ये ब्रह्मवादीश्वराः।
तेषां गोत्रभवो द्विभाष्युपपदः श्रीसोमनाथः कविः
पुत्रो वेङ्कटरत्न बाप सुधियोर्यस्तेन यत्नान्मया।। (राजरत्नमालाचम्पूः 1-9)

[29] हृद्यं यद्यपि पूर्वराजचरितं बद्धं न पत्राकृति
प्रख्यातं च यदा कदापि भुवने शीर्यत्यनेहक्रमात्।
किन्त्वैवैतदनश्वरं सुकविताधारासुधागुम्फितं
गोदानीरविमिश्रितं शुचि यथा गङ्गाम्बु भृङ्गारुके।। (राजरत्नमालाचम्पूः 1-6)

[30] वार्णी यद्गुणसौरभाः कविमुखास्थानेष्वलञ्चक्रिरे
श्लोकानीकलसत्प्रसूनविसरादुद्धूय स श्रीमुखः।। (राजरत्नमालाचम्पूः 1-11)

[31] (राजरत्नमालाचम्पूः 1-79)

In Public domain. Digitization Muthulakshmi Research Academy

1 श्रीमुखः
2 कृष्णः[32]
3 श्री शातकर्णि[33]
4 पूर्णोत्सङ्गः[34]
5 शातकर्णि[35]
6 लम्बोदर[36]
7 आपीलक[37]
8 मेघस्वाति[38]
9 स्वाति[39]
10 स्कन्दस्वाति[40]
11 मृगेन्द्रस्वाति[41]
12 कुन्तलशातकर्णि[42]
13 स्वातिकर्णि[43]
14 पुलोमावि[44]
15 नेमिकृष्ण[45]
16 हाल[46]
17 मन्दुलक[47]
18 पुरीन्द्रसेन[48]
19 सौम्य[49]

20 सुन्दरशातकर्णि[50]
21 चकोरशातकर्णि[51]
22 शिवस्वाति[52]
23 गौतमीपुत्र शातकर्णि[53]
24 पुलोमा[54]
25 शिवश्री[55]
26 शिवस्कन्द[56]
27 यज्ञश्री शातकर्णि[57]
28 विजयशातकर्णि[58]
29 चन्द्रश्री[59]
30 पुलोमावी[60]

[32] (तत्रैव 2-5)
[33] (तत्रैव 2-18)
[34] (तत्रैव 3-6)
[35] (तत्रैव 3-17)
[36] (तत्रैव 3-83)
[37] (तत्रैव 3-90)
[38] (तत्रैव 3-93)
[39] (तत्रैव 3-94)
[40] (तत्रैव 3-96)
[41] (तत्रैव 3-98)
[42] (तत्रैव 4-2)
[43] (तत्रैव 4-93)
[44] (तत्रैव 4-100)
[45] (तत्रैव 4-100)
[46] (तत्रैव 5-5)
[47] (तत्रैव 6-3)
[48] (तत्रैव 6-6)
[49] (तत्रैव 6-10)
[50] (तत्रैव 6-12)
[51] (तत्रैव 6-15)
[52] (तत्रैव 6-16)
[53] (तत्रैव 7-3)
[54] (तत्रैव 7-21)
[55] (तत्रैव 9-3)
[56] (तत्रैव 9-5)
[57] (तत्रैव 9-8)
[58] (तत्रैव 9-36)
[59] (तत्रैव 9-39)
[60] (तत्रैव 9-41)

In Public domain. Digitization Muthulakshmi Research Academy
एवम्प्रकारेण पुराणेषु इतिहासग्रन्थेषु शालिवाहनराजानः ये अवर्तन्त तेषां समेषां राज्ञां[61] चरितमुपावर्णयत् अस्मिन् राजरत्नमालाचम्पूकाव्ये महाकविः श्री सोमनाथशास्त्री। शातवाहनराजानः एते आहत्य पञ्चषष्ट्युत्तरत्रिंशद्वर्षाणि यावत् आन्ध्रदेशं परिपालयामसुरिति कविः स्वयं कथयामास[62]।

श्रीराजरत्नमालाचम्पूकाव्यसौष्ठवम्

यथा निर्दिष्टं पूर्वमस्मिन् निबन्धे द्विभाषि सोमनाथमहाकविः 30 शालिवाहनराज्ञां चरितमवर्णयत् तथापि श्रीमुख-शातकर्णि-कुन्तलशातकर्णि-हाल-गौतमीपुत्र शातकर्णि इति पञ्च महाराजानां चरितं विस्तृतेनावर्णयत्। श्रीमुखस्य विजययात्रां, नागनीकया तस्य विवाहः प्रथमे रत्ने अवर्णयत्। ततः द्वितीये रत्ने प्रथमशातकर्णिं वर्णयन् **पुम्भावैकसरस्वती बहुकलासाहित्य-विद्यविधौ, लोकानां समदृष्टिरेव गुणवान् तद्राजचूडामणिः**[63] इति तस्यौन्नत्यम् अकथयत्। अस्य परिपालने धर्मधेनुः पादचतुष्टयं निक्षिप्य यथेष्टव्यवहारं विहरति स्मेति, पित्रा आदिष्टोऽयं शातकर्णिः **अश्वमेध, शतातिरात्र, आप्तोर्याम, गवामयन** इत्यादिक्रतून् चकारेति, प्रजानुरञ्जनेन राज्यम् अकार्षीदिति अवर्णयत्[64]।

इतिहासग्रन्थेषु राज्ञः शातवाहनस्य विषये प्रसिद्धा कथा दृश्यते यस्यां राजा शातवाहनः जलक्रीडायां महाराण्या सह क्रीडन् उदकं तस्या उपरि पातयति स्मेति, राजन् मोदकेन ताडय मोदकेन ताडय इति यदा सा अवदत् तदा संस्कृतभाषानभिज्ञः सः मोदकानि आनीय ताम् अददत् इति, तद्दृष्ट्वा महाराणी खिन्ना भूत्वा पण्डितान् समाह्वयत् इति तेषु शर्ववर्म नाम विपश्चित्

---

[61] काव्येऽस्मिन् एकैकस्य राज्ञः नामोच्चारणसन्दर्भे अस्माभिः विशेषेण अवगमयितुं स्पष्टाक्षरैः सङ्केतितम्।
[62] तत्रैव 9-43
[63] तत्रैव 2-19
[64] वेदमातुर्महागर्भे स्थितान् गूढान् महाफलान्। विदुषामपि दुर्वेद्यान् प्रचारासंस्थितान् घनान्।। शातातिरात्रा आप्तोर्याम गवामयन नामकान्। चकारान्वारम्भणीयमखान् बहुमखान् स राट्।। तत्रैव 2-100,102

In Public domain. Digitization Muthulakshmi Research Academy

राजानं शातवाहनं प्रति षट्त्सु मासेषु संस्कृतं शिक्षिष्ये इति प्रतिज्ञां[65] चकारेति। एनामेव कथाम् अत्र द्विभाषिवर्यः कुन्तल शातकर्णिविषये प्रास्तौत्।

स बभौ सर्वभाषाणां सम्पदा संस्कृतं विना।

श्रियेव सर्वपुष्पाणां वसन्तं मालतीं विना।।

ज्ञात्वा चित्रान्वयं वाक्ये कलत्रस्यावनीपतिः।

ललज्जे स्वानभिज्ञत्वं संस्कृतस्य निनिन्द च [66]।।इति शातकर्णिम् अवर्णयत् कविः।

ततः

बालोप्यबूत् प्रतिमहीपतिशौर्यरोचि-

हालाहलाहरणकौशलनीलकण्ठः।

लीलावलीढ गिरिभिः करभैः स्वकीयैः

हेलैकजैत्रगमनेषु स एव हालः[67]।।

इति प्राकृतवाङ्मये प्रथितयशसं हालचक्रवर्तिनम् अवर्णयत् कविः। लीलावत्या सह तस्य विवाहः, तस्य राज्यपालनम्, सामाजिकीं सेवां चाकथयत् सोमनाथकविः। तदनन्तरं शातवाहनवंशे प्रसिद्धस्य गौतमीपुत्रशातकर्णि-महाशयस्य वर्णनं चकार सः[68]। अत्र कविः गौतमीपुत्रशातकर्णिना कृतम् अश्वमेधयागं सुमधुरया शैल्या अवर्णयत्[69]। गौतमीपुत्रशातकर्णिः बहुविप्रकुटुम्बपोषकः, विद्वान्, कविः, पण्डितपक्षपाती, महागुणवान्, लोकनुतैकवीरः. पवित्रवेदोक्तपथानुगः, प्रजाहितैषी आसीदित्यवर्णयत् सः।

---

65 श्रुणु त्वमिह मद्वचस्सुरसरस्वतीपण्डितं न चेद्यदि करोम्यहं नरपतिं मदुक्तावधौ।
चरामि शिरसा वहन् महिविभागमाजीवितं गुणाढ्य तव पादुके बहुलनीचतापादिके।। तत्रैव 3-64

66 तत्रैव 3-3, 49

67 तत्रैव 5-5

68 स एष गौतमीपुत्रः पुत्रोऽस्यासमभूतियुक्। समोऽबून्महसा धात्रामान्धात्रा च प्रसिध्दितः। तत्रैव 6-18

69 तत्रैव 6-43- 51

काव्यसौन्दर्यम्

इदं द्वितीयम् ऐतिहासिकं काव्यं विलिखितम् नवसु रत्नेषु[70]। पूर्वं तु चम्पूकाव्येषु उल्लास-उच्छ्वास-स्तबक इत्यादिरूपेण विभजनम् अकार्षुः कवयः। इदानीमत्र द्विभाषि सोमनाथकविः स्वकाव्यं रत्नमिति नाम्ना विभजनम् अकार्षीत्। अत्र शातवाहनराजानां चरितं प्रधानतया वर्णितवान् सः। एवं चाधिकतया तेषां राज्ञां गुणान्, परिपालनदक्षतां, समाजसेवां, कविपण्डितपोषणं, यज्ञयागादिक्रतूनाम् आचरणम् इत्याद्यनेकान् अंशान् अत्र काव्ये प्रास्तौत्। अत एव रत्नसदृशानां चरितमुपवर्णितमस्मिन् काव्ये इति कृत्वा प्रायः श्रीमान् सोमनाथमहाकविः **रत्नम्** इति नाम्ना अध्यायानां विभजनं कृतवान् स्यात्।

अन्यच्च काव्यस्यास्य वैशिष्ट्यम् इदमस्ति यत् सोमनाथकविः प्रत्येकस्य रत्नस्य (अध्यायस्य) आदौ अन्त्ये च स्वेष्टदेवतां भगवतीं कामेश्वरीं प्रार्थयामास। साधारणतया काव्येषु आदावेव मङ्गलाचरणं विधास्यन्ति कवयः इति विदन्त्येव सहृदयाः। **काव्ये चित्रश्रियं मे कलयतु कुलगाऽऽविश्य कामेश्वरी नः** इत्यारभ्य **वन्देऽहं भुवनेश्वरीं शुभकरीं श्रीराजराजेश्वरीम्**[71] इत्यादिना काव्यस्य समाप्तिं कृतवान् सः। अपि च - आन्ध्रेशे स्फुरति ततश्च शातकर्णौ आन्ध्रत्वे दिशि दिशि पुष्पिते यशोभिः।

आन्ध्राणां मृदुमधुरैकमञ्जुवाणी मञ्जीरध्वनिभिरुदञ्चिते दिगन्ते[72]॥ इत्यादिभिः बहुभिः श्लोकैः बहुत्र आन्ध्रीयः अयं कविः आन्ध्रदेशस्य वैशिष्ट्यं कथयितुं प्रायतत। राज्ञां वर्णनासन्दर्भे बाणमहाकवेः हर्षचरितम् अन्वसरत्।

---

[70] पूर्वं जानराजचम्पूकाव्यं कृष्णदत्तकविना रचितमिति ज्ञायते साहित्येतिहासग्रन्थाधारेण।
[71] तत्रैव -1-1, 9- 45
[72] तत्रैव 3-3

In Public domain. Digitization Muthulakshmi Research Academy

उपमालङ्कारे कालिदासमहाकविं, श्लेषालङ्कारे नलचम्पूकर्तारं त्रिविक्रमभट्टं, विरोधाभासे बाणमहाकविम्, अर्थान्तरन्यासे भारविमहाकविं, ललितपदविन्यासे दण्डिमहाकविम् च स्मारयति द्विभाषि सोमनाथकविः। विविधैः अलङ्कारैः विभिन्नैश्च छन्दोभिः राजरत्नमालाचम्पूकाव्ये शातवाहनराजानां चरितम् उपवर्णयन् चम्पूकाव्यप्रपञ्चे विशिष्टं स्थानम् आप्नोत् अयं विद्वत्कविः। अपि च

दीपे दीप्ते गृहं सर्वं योग्यं भद्रीकृतेः खलु (1-33)
सूर्यस्य करदीपेन पथो दर्शयितुर्विधा (1-41)
बालसर्पोप्यनूनेन दण्ड्यो दण्डेन खण्डशः (1-44)
पूर्वापरकार्यत्वं विप्रतिषेधे यथास्ति शब्दविधौ।
उत्तरदक्षिणभागौ वैदर्भौ मागधान्ध्रजातौ।। (2-68)

सलिललिपिसदृशमेव हि नृपतेस्तव शिक्षणं भविष्यति । (3-62)

तथा हि यावानपि विश्वनायकः प्रियानिबन्धं शिरसा वहेत् खलु।।(3-77)

वज्रेण वज्रं तु विभिद्यते खल्वितीवतद्घोररणे निरस्ताः।(9-22)

इत्याद्यनेकैः सुभाषितैः मध्ये मध्ये सहृदयमनांसि रञ्जयति द्विभाषि सोमनाथकविः।।

कार्तज्ञ्यनिवेदनम्

द्विभाषि सोमनाथकविसदृशान् महतः कवीन् परिचाययितुं कटिबद्धा इयं संस्कृतपरिषत् 'दुर्लभग्रन्थपुनर्मुद्रणपरियोजना' नामकेन प्रकाशनानि विदधाति। इयं च परियोजना केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रवर्तते। एतादृशमहत्तरग्रन्थनिर्माणे मयि विश्वस्य, कार्यकर्तृत्वं प्रेरयित्वा च सदवकाशं कल्पितवद्भ्यः गुरुभ्यः छात्रवत्सलेभ्यः संस्कृतपरिषत् निदेशकेभ्यः

In Public domain. Digitization Muthulakshmi Research Academy

आचार्य के नीलकण्ठमहाभागेभ्यः विशेषतः भूयोभूयो नमःकुसुमाञ्जलिपूर्वकं कार्तज्ञं निवेदयामि। तथैव सर्वदा मां प्रोत्साहयितृभ्यः संस्कृतपरिषद् सदस्येभ्यश्च आधमर्ण्यं प्रकटयामि।

एवमेव केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यश्च भूरिशः धन्यवादान् वितीर्य उस्मानियाविश्वविद्यालयस्य कुलपतये, कुलसचिवाय च नमोवाकान् समर्पयमामि।।

इत्थं भवदीयः

जोषि भरद्वाजः

In Public domain. Digitization Muthulakshmi Research Academy

उपमालङ्कारे कालिदासमहाकविं, श्लेषालङ्कारे नलचम्पूकर्तारं त्रिविक्रमभट्टं, विरोधाभासे बाणमहाकविम्, अर्थान्तरन्यासे भारविमहाकविं, ललितपदविन्यासे दण्डिमहाकविम् च स्मारयति द्विभाषि सोमनाथकविः। विविधैः अलङ्कारैः विभिन्नैश्च छन्दोभिः राजरत्नमालाचम्पूकाव्ये शातवाहनराजानां चरितम् उपवर्णयन् चम्पूकाव्यप्रपञ्चे विशिष्टं स्थानम् आप्नोत् अयं विद्वत्कविः। अपि च

दीपे दीप्ते गृहं सर्वं योग्यं भद्रीकृतेः खलु (1-33)
सूर्यस्य करदीपेन पथो दर्शयितुर्विधा (1-41)
बालसर्पोप्यनूनेन दण्ड्यो दण्डेन खण्डशः (1-44)
पूर्वापरकार्यत्वं विप्रतिषेधे यथास्ति शब्दविधौ।
उत्तरदक्षिणभागौ वैदर्भौ मागधान्ध्रजातौ।। (2-68)

सलिललिपिसदृशमेव हि नृपतेस्तव शिक्षणं भविष्यति । (3-62)

तथा हि यावानपि विश्वनायकः प्रियानिबन्धं शिरसा वहेत् खलु।।(3-77)

वज्रेण वज्रं तु विभिद्यते खल्वितीवतद्घोररणे निरस्ताः।(9-22)

इत्याद्यनेकैः सुभाषितैः मध्ये मध्ये सहृदयमनांसि रञ्जयति द्विभाषि सोमनाथकविः।।

कार्तज्ञ्यनिवेदनम्

द्विभाषि सोमनाथकविसदृशान् महतः कवीन् परिचाययितुं कटिबद्धा इयं संस्कृतपरिषत् 'दुर्लभग्रन्थपुनर्मुद्रणपरियोजना' नामकेन प्रकाशनानि विदधाति। इयं च परियोजना केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रवर्तते। एतादृशमहत्तरग्रन्थनिर्माणे मयि विश्वस्य, कार्यकर्तृत्वं प्रेरयित्वा च सदवकाशं कल्पितवद्भ्यः गुरुभ्यः छात्रवत्सलेभ्यः संस्कृतपरिषत् निदेशकेभ्यः

In Public domain. Digitization Muthulakshmi Research Academy

आचार्य के नीलकण्ठमहाभागेभ्यः विशेषतः भूयोभूयो नमःकुसुमाञ्जलिपूर्वकं कार्तज्ञं निवेदयामि। तथैव सर्वदा मां प्रोत्साहयितृभ्यः संस्कृतपरिषद् सदस्येभ्यश्च आधमर्ण्यं प्रकटयामि।

एवमेव केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यश्च भूरिशः धन्यवादान् वितीर्य उस्मानियाविश्वविद्यालयस्य कुलपतये, कुलसचिवाय च नमोवाकान् समर्पयमामि।।

इत्थं भवदीयः

जोषि भरद्वाजः

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

विषयसूचिका

क्र.सं	विषयः	पृ.सं
1)	Foreword	i
2)	प्रस्तावना	xi
3)	प्रथमं रत्नम्	1
4)	द्वितीयं रत्नम्	16
5)	तृतीयं रत्नम्	29
6)	चतुर्थं रत्नम्	42
7)	पञ्चमं रत्नम्	57
8)	षष्टं रत्नम्	87
9)	सप्तमं रत्नम्	98
10)	अष्टमं रत्नम्	101
11)	नवमं रत्नम्	106

श्री कामेश्वर्यै नमः

In Public domain. Digitization Muthulakshmi Research Academy

"उभयभाषासनाथ" द्विभाषि सोमनाथकृता

श्री राजरत्नमालाचम्पूः

(प्रथमरत्नम्)

यस्या नासाग्रमुक्ता स्फुरति कुमुदवद्या सरस्यास्यबिम्बे
यस्या व्योमेव तारैर्हरकरनखरैर्लालिता कुन्तलश्रीः ।
यन्मौलीन्दोरघोंऽसुर्नयति मृगमदस्थासके चन्द्रशोभां
काव्ये चित्रश्रियं मे कलयतु कुलगाऽऽविश्य कामेश्वरी नः ॥1॥

सुहासिनी शुभ्रजलेजवासिनी सरोजिनी सारगुणैकभाजिनी।
अतन्द्रिणी मय्यबधीन्द्रनन्दिनी करोत्विदानीं कुशलं कृपाधुनी ॥2॥

यस्याः प्रस्तरणेन सुस्वरततेस्तलावलेर्वादने
तन्त्री पल्लविता स्वयं जडमपि व्यालीनसन्मूर्छना ।
नाम्नि प्रेम्णि सरस्वती भवति या प्रश्लिष्टवर्णाकृति-
स्सा भूयान्मम नव्यकाव्यकृतवाक्पुञ्जे ध्वनिव्यञ्जनी ॥3॥

विमलगाङ्गतरङ्गशुचिस्मिता रुचिरशोणरसस्फुरिताधरा ।
कृतिविधौ वितनोतु रसोत्तमा रसवतीं सुमतिं मम भारती ॥4॥

स्वसप्तगोदावरतीरगोस्तनीवनीवसत्कीरवचः प्रचोदिनी ।
तनोत्वियं मे कृतिमान्द्रमेदिनी विनूत्नमाधुर्यरसप्रसादिनीम् ॥5॥

योऽधाद्वेदान्तभाष्यप्रवचनसमये मञ्जुलोक्तौ शुकत्वं
योऽभूदद्वैतखण्डे शतधृतिरनिशं खण्डने दुर्मतानाम् ।
योगे चानन्दलीलासरसि विहरणे योऽभवद्राजहंस-
स्तस्माच्छ्रीशङ्करार्यान्नतिनुतिविषयः कोऽधुना धीधनो नः ॥6॥

In Public domain. Digitization Muthulakshmi Research Academy

हृद्यं यद्यपि पूर्वराजचरितं बद्धं च पत्राकृति
प्रख्यातं च यदा कदापि भुवने जीर्यत्यनेहः क्रमात् ।
किन्त्वेवैतदनश्वरं सुकविताधारासुधागुम्फितं
गोदानीरविमिश्रितं शुचि यथा गङ्गाम्बु भृङ्गारुके ॥7॥

ददाति शय्यासुखमङ्गना यथा प्रसादतां चान्द्रमसीव सत्कला।
अतीव चामोदयतीव मालती बहूपकर्त्री कविता नहीतराः ॥8॥

ब्रह्मज्ञानसुधाब्धिमन्दरगिरिर्येषां महोपज्ञता
जाताऽऽसन्निह वालखिल्यमुनयो ये ब्रह्मवादीश्वराः ।
तेषां गोत्रभवो द्विभाष्युपपदश्रीसोमनाथः कविः
पुत्रो "वेङ्कटरत्न" "बाप" सुधियोर्यस्तेन यत्नान्मया ॥9॥

सम्पूर्णविषया राज्ञां चम्पूरूपान्ध्रभूभुवाम् ।
रत्नमालाभिधानेन नूत्नमारभ्यते कृतिः ॥10॥

अस्तिस्वस्तिकरस्समस्तजगतां विस्तारितान्ध्रावने-
रेकच्छत्रपतिर्बृहस्पतिमतिश्रीशातवाहः पुरा ।
वाणीं यद्गुणसौरभाः कविमुखास्थानेष्वलञ्चक्रिरे
श्लोकानीकलसत्प्रसूनविसरादुद्धूय स **श्रीमुखः** ॥11॥

निरीक्ष्य दृढसक्ततद्विपुलधर्मकर्मोन्नतिं
घनश्रुतिपथोल्लसद्गुणमयीं वृणीते स्म तम् ।
यशस्त्रगुपहारिणी प्रमदिनी मणीहारिणी
स्वयंवरणहारिणी बहुविधा जयश्री रणे ॥12॥

हस्ताहस्ति यदीयहस्तिनिवही दिग्दन्तिसन्तानितं
कुर्वाणः कलहं जिगाय नितरां यज्जैत्रयात्रालिषु ।

In Public domain. Digitization Muthulakshmi Research Academy

नानाराजकिरीटकोटितटविन्यस्तस्फुरद्रत्नभा
भानुद्योतपरीतपादजलजो भाति स्म स श्रीमुखः ॥13॥

सुधाम्बुधिर्गुम्फितरत्नसंग्रहे विधुन्तुदश्शात्रवचन्द्रनिग्रहे ।
बुधेन्द्रवासोऽस्य बभूव भूभुजः 'पिथुण्ड' नामा नगरेकतल्लजः ॥14॥

अमुष्यचाऽऽस्तां चतुरङ्गवाहिनी पुरान्तिके गौतमपुण्यत्वाहिनी ।
तरङ्गिते शौर्यजलान्तरङ्गिते तुरङ्गमेधावभृधे सतं हि ते ॥15॥

गद्यम् - तस्य श्रीमुखशातवाहमहाराजस्य आनुवंशिकजनन्याऽनन्य शीतवारि-निवारितस्नातृपातकक्लमसमुत्करया पुरप्रमदाकपोलपालिकाकुच मण्डलन्यस्त-शस्तकस्तूरिकाकुंकुमहारिहारिद्रभद्ररेणुमुद्रिततुङ्गतरङ्गसङ्घसङ्घट्टितपट्टभङ्गरङ्गचि त्रवर्णामोदमेदुराम्बुसम्भूतपूतपवनपोतपरम्परया, तटद्रुकुसुमाटवी हसित-लसितकुसुमविसरविसृमरपरागपरभागपरीतपरीमलमिलन्मिलिन्दध्वनिगुम्फित कोकिलाकुहूकुहूकलकलायितकण्ठोपकण्ठया, विशालान्ध्रभूमिसीमन्तिनी-गलान्तिकललन्तिकायितगौतमीस्त्रवन्तिकया कृताकृत्रिमप्रत्न परिखस्य विलिखद्विहायससमुन्नताकारगोपुरस्य महीनपुरस्य तत्पुरस्य पुरस्सीम्नि चञ्चच्चन्द्रशिलासौधचन्द्रशालाविशालभूभागभाभासुरमहासभाभवन निर्मित-भर्मसिंहासनमधिरुह्य तस्मिन्नरनाथशेखरे विनिर्मलधर्मसूक्ष्ममनुव्रजन् निजप्रजासन्ततिं स्वसन्ततिमिव पालयति सकलान्ध्रमहनीयमहीपुरन्ध्रिका प्रजानां विनिर्जितेन्द्रनीरन्ध्रयोग आभोग आसीत् ॥

अपि चाऽऽसन्नस्य धन्यराजमूर्धन्यस्य उपराजधान्यो धान्यकटकादय एकोनत्रिंशत्सङ्ख्याका अन्या नगर्यश्च ॥

एकदा निशावसरे स विशांपतिस्स्वनिशान्तमणिमन्दिरान्तरिन्दुकान्त कान्तशिलाकान्तिसन्तानदन्तुरितभूभागमध्यविद्योतितदन्तिदन्तगारुत्मतमणि

In Public domain. Digitization Muthulakshmi Research Academy

सन्ततसन्तानितपर्यङ्कपर्यञ्चितहंसतुलिकाकल्पितानल्पतल्पोपरिमागमधिवसन्, वसन्तवासन्तिकालतान्तकुन्दबृन्दवृन्दिष्ठमन्दारहारिकल्हारकुमुदसमुदयसौरभ गुम्भशुम्भन्मल्लिकावेल्लितजालकायातमृदुवातशीतलस्पर्शमनुभवन्नस्वप्नसुख स्वापमवाप ॥

ततो गतवति कियति चित्समये कमनीयसमक्षगवाक्षमार्गप्रविष्टोषः कालचन्द्रिकासान्द्रकिरणसमुत्किरणस्रवच्चन्द्रमणिशकलनिकरालम्बनवितान-विकिरद्वारिलवदलनवमल्लिकामुग्धप्रस्निग्धपुष्पशय्यामनोहरे, मन्दमन्द-चलन्मलयानिलवलयनसंक्रान्तविश्रान्तिसुखलीलाविलसदश्रान्ते, बहुप्रशान्ते, तन्निशान्ते परिक्रान्तनिद्रस्स महीकान्तस्समुन्मील्य लोचने स्वान्त एवमचिन्तयत् ॥

"सम्प्रति सम्प्रतिनामा मगधराजोऽपराजिततेजास्स्वराष्ट्रमासौराष्ट्रं व्यापयित्वा 'अपरान्तस्य' नगरस्य अपरान्तक इवावतिष्ठति, बलावलेपेन कबलनाय तदनेकबलनायक सामग्री समुदग्रतया, समग्रमाक्रमिष्यति चेत्सौराष्ट्रं स नर्मदामुत्तीर्य महाराष्ट्रमप्यवष्टम्भिष्यते, ततो महती विपत्तिस्समापतिष्यति तत्परिसरान्ध्रप्राज्यसाम्राज्यस्य । तदस्माभिरेव प्रथमं प्रथने 'रठिक, पिटिक, भोजकाः' महाराष्ट्रभुभुजो विजेतव्याः। अपि च महाराष्ट्रेण साकं महाराष्ट्र मातन्यतामान्ध्रराष्ट्रम्" इति मत्वा स दूरदर्शी महाराजो महामन्त्रिणा मन्त्रयितुं सुनिश्चितमतिनिश्चक्राम समयोचित विविधविधीनधिगन्तुम्॥ तदा च - ॥16॥

वेगादुषस्स्फुटयति स्म सहाब्जकोशै-
रर्घ्योत्किरत्करपुटान् घटितान् द्विजौघैः।
कल्हारहारिमुकुलैर्विकलय्य नैशं
नैशान्तदीप कलिकावलिकान्तिपुञ्जम् ॥17॥

In Public domain. Digitization Muthulakshmi Research Academy

दिक्सुन्दर्यो वदनभवनं चक्रिरे च क्रमेण
प्रोचुर्भृङ्गाः कमहकमलाख्यातिवैतालिकोक्तीः ।
लक्ष्मीरासीद्दिवि नवऋतुस्नातिका कुंकुमापैः
फाले प्राची विरचितवती सान्द्रसिन्दूरबिन्दुम् ॥18॥

कुन्दं सन्दलयत्सुगन्धमधुरं मन्दानिलं शर्मणां
कन्दं कन्दलयन्मिलिन्दविततेर्मारन्दबिन्दूत्करैः।
तुन्दं बन्धुरयन्मुखं मुखरयत्स्वाध्यायिनामारुणं
बिम्बं बिम्बकदम्बमम्बरलतालम्बं समुद्गुम्भितम् ॥19॥

सूर्योदये सुरवधूपदकञ्जरञ्जत्प्राचीनयावरसलेपयुता इवापः ।
मन्दाकिनी लहरिकाविहिते विहारे प्राचीनभागमतिरक्तिरलञ्चचकार ॥20॥

कोकौ कोकनदेऽवदातनलिनीफाले मदालीयुतौ
हंसौ प्रांशुदले विनीलनलिनीवक्रे यथाचित्रणम् ।
तत्प्रत्यब्जसरोवरं परिणये प्रामावलक्ष्मीनयो-
र्माणिक्येन्दुसुरेन्द्ररत्नरचिता वेदीव मोदायितम् ॥21॥

ततः कृतौषस्य विधिर्महारथेस्स वारुणीन्द्रस्सह राजबन्धुभिः ।
सभाजयन् सल्लपनैश्छलोक्तिभिस्सभां जगामाखिलभावमर्मवित् ॥22॥

द्वेषाभूषितिपारितोषिकहयांस्तत्पारशीकागतान्
संमृज्य स्वकरेण तुङ्गधवलैरङ्गैर्बलाऽभङ्गुरान् ।
कर्णाटाटविकात्तमत्तकलभान् हस्तैर्नमस्कुर्वतः
प्रेक्ष्य स्निग्धमनोज्ञमन्दहसितं बद्धान् बहिःप्राङ्गणे ॥23॥

तुरगोह्यमानरथवरमवरुह्य विशालचन्द्रशालां ताम् ।
आरुह्य निरीक्षकजनवरोक्ष्यत्कौतुकं सरन्मन्दतरम् ॥24॥

In Public domain. Digitization Muthulakshmi Research Academy

लाटभूपतिपटीरपालिका उत्कलेन्द्रनवमौक्तिकस्रजः।
सत्कृतीर्निजसभासमागतास्ता विकृष्य सुकटाक्षरोचिषा॥25॥

विद्युद्वेल्लिततालवृन्तपवनैर्हृद्यं तटिद्दीपिका-
विद्योतप्रममभ्रयन्त्रनिचितं श्रोतुं सुदूरादपि ।
नानादेशविदेशसन्ततचलद्वार्ताजवश्रावय-
द्यन्त्रोद्यद् ध्वनिदन्तुरं निजसभामध्यं महीशोऽविशत्॥26॥

गद्यम् - तत्र देवहस्तग्रस्तोभयपार्श्वप्रजामालिकान्तरे स्तोत्रपाठकै रभिष्ठ्यमानयशःप्रशस्तिनिस्थलनिस्तुलोपन्यासरचनानि वचनानि फालविन्यस्त हस्तैस्साष्टाङ्गमनवष्टम्भमाकुम्भिनीतलस्पर्शमवनम्य शिरसा प्रणीतप्रणामानां विनीतिनीतिविनुतभावभावितानां निजपादैकजीविकानां सेवकानामभिवादांश्च, अनुपदमनुगच्छज्जनपदागतनिजाश्रितै ऋजुविश्रुतैः यजुरादिवेदविद्द्विजैस्सह निजास्थानीविराजिद्विजसमाजेनैककण्ठ्यं जेगीयमानत्रयीमय्याशीःपरं पराश्च सामन्तमहीकान्तमन्त्रिमुख्यलोकज्ञ विज्ञापयिष्यद्विविधान्ध्रविषयविषयांश्च, अभि शृण्वानः, अङ्गीकुर्वाणः, आप्नुवानः, अनुमन्वानः, आभोगचिरत्नखचित विभाविभूषणाकुण्ठकण्ठीरवासनमुपसृत्य उपविश्य च स्वमुद्दिश्य समुत्थितेभ्य स्सर्वसभ्येभ्यः पक्ष्मलाधोविक्षेपेर्णवोपवेष्टुमनुज्ञामादराददात् ॥ 27॥

शृण्वन्निज श्लोकयुतोक्तिधारां सारामुपश्लोकयतां कवीनाम् ।
गानं च गाणिक्यगलस्वनाञ्चन्माणिक्यचञ्चत्स्वविपञ्चिकानाम् ॥28॥

पश्यन् दैशिकलास्यादि नृत्यं स्तुत्यं कृताद्भुतम् ।
वीणावेणुमृदङ्गाऽनुक्वाणमेणीदृशां ततः ॥29॥

गद्यम् - प्रशान्ततस्स्वपार्श्वान्तिक उपविशन्तं वर्षीयसं सन्तमनन्तधी-निर्जितानन्तफणिकान्तं भूकान्तो महामन्त्रिणमामन्त्र्य, "अद्य मध्यन्दिनानन्तरे

In Public domain. Digitization Muthulakshmi Research Academy
अस्म- न्निशान्त एकान्तगृहे मन्त्रयितुमागन्तव्य"मित्यादिश्य चोद्दिश्य सभ्यान् "अल मेतावतैव कालेनेयं सभे"ति प्रकटय्य भानुमण्डले लसति वियन्मण्डलमध्ये महान्तं निजमगारमगात्। कृतमज्ञनमध्यन्दिनजनार्दन-पूजाभोजनविधिरधिगततल्पो विश्रम्य निशम्य चाल्पकालेनैव भृत्येनागत्य "महामात्या एकान्तगृहे सन्ति निरीक्षमाणा भवन्त"मिति, तं तु सोऽयमस्मीत्युक्त्वा तन्निकाय्य मयासीत्॥30॥

तत्र योगो द्विषां राजमार्ताण्डामात्यचन्द्रयोः ।
गतेरासीद्यथाऽऽघाटो मार्ताण्डामास्थचन्द्रयोः ॥3॥

यथोचितं समासित्रोरथालोचयितुं तयोः।
हृदार्जितमिदं राजा मृदूर्जितमवोचत ॥32॥

स्वप्रतापे निगक्षेपे राष्ट्रं सुष्ठुकृतं सुभि ।
दीपे दीप्ते गृहं सर्वं योग्यं भद्रीकृतेः खलु ॥33॥

सम्पत्तीब्रदलाढ्योऽस्ति सम्प्रतिर्मागथोऽधुना।
तत्प्रतिष्टम्भितुं सैन्यं सम्पाद्यं स्यादितोऽधिकम् ॥34॥

अपटव एव पिटिनिका
"रठिका" अपि "भोजका" महाराष्ट्रे ।
सुविरलचमूसमूहा
नृपालका वाहिनीं न उपरोद्धुम् ॥35॥

बलोदग्रतया सैन्यमदैन्यं रुन्धतान्मम ।
बहूंस्तद्राष्ट्रपानल्पान् महाबष्टम्भसम्भृतान्॥36॥

 In Public domain. Digitization Muthulakshmi Research Academy

ततोऽद्यानर्मदातीरं स्कन्धावारः प्रसार्यताम् ।
आन्ध्रीपुरन्ध्रीनीरन्ध्र प्रजौजो दर्शयिष्यति ॥37॥

कन्दलन्ती दलैस्तेषां कोशैश्च प्रविभासिनी ।
तैरात्तैर्जातिरस्माकं जातिवत्पुष्पिता स्वयम् ॥38॥

हितं धी विहितं राजा वाक्प्रबन्धममुं बृवन् ।
तृष्णीमास महामात्यभारतीरीतिकांक्षिणम् ॥39॥

पुष्पितं तं सुनिष्पन्नमुवाचैवंविधं मिथः ।
अर्थमर्यादया राजकार्यार्थी सचिवो वचः॥40॥

कूलङ्कषा मनीषा ते राजनीत्यां; वचस्त्विदम् ।
सूर्यस्य करदीपेन पथो दर्शयितुर्विधा ॥41॥

यथामति तथापीदं आज्ञोल्लङ्घभिया मया ।
वक्ष्यते सिद्धसङ्कल्पं त्वामुद्दिश्योत्थया धिया ॥42॥

सन्ति नो दन्तिनोऽर्वाणो सहस्रं द्विसहस्रकम् ।
तथाचैकगुणाधिक्यं रथा लक्ष पदातयः॥43॥

अलं वापि जये कुर्यादितोपि प्रबलं बलम् ।
बालसर्पोऽप्यनूनेन दण्ड्यो दण्डेन खण्डशः॥44॥

महाराष्ट्रमहीभागप्रजा जगति पौरुषे ।
अल्पास्स्वल्पास्सन्तु किन्तु तद्भटा उद्भटास्तय ॥45॥

तस्मादस्मत्प्रजा वाऽपि विजेत्री तत्समा युधि।
प्रबोद्धव्याऽद्य जातीयनायकोद्यन्महोद्यमे॥46॥

In Public domain. Digitization Muthulakshmi Research Academy

अमून् नेतॄन् समीकृत्य विद्यमानोद्यमं वदेत् ।
तैर्जानद्भिः प्रबोध्यन्ते ग्रामे ग्रामे निजाः प्रजाः ॥47॥

सैन्याब्धे राजचन्द्रस्य तदानीं ते भविष्यति।
सोऽल्बणस्योद्यमार्थोऽयमर्धोदयसमागमः ॥48॥

ज्ञानवृद्धं समृद्धं तत् सदर्थैर्मन्त्रिमन्त्रणम्।
वलीवलितफालेन नृपालोऽन्तर्व्यलोकयत् ॥49॥

स्वर्णवर्णैर्विलेख्यानि वाक्यान्यालोच्य मन्त्रिणः।
चेतसा ज्ञातसारो राट् आशंशिष्ट शशंस च ॥50॥

त्वदाशयपरिस्पृष्टं मृष्टं मे जातमीप्सितम् ।
अव्याजोत्पत्तिमद्रत्नं ग्राणेनोत्तेजितं यथा ॥51॥

इत्युक्त्वा तं महामात्यं तत्कृत्येषु नियम्य च ।
सत्कृत्यार्थैर्विनिर्गन्तुमदादाज्ञां मुदा नृपः ॥52॥

ततः परेद्युः पतिकार्यतत्परः परेङ्गितज्ञोऽयममात्यशेखरः।
अरं समामन्त्र्य तदन्यमन्त्रिभिः प्रणीतकार्यानुगुणप्रणालिकः॥53॥

"निकाया" ख्यप्रजासङ्घनेतॄनाकारयत्तदा ।
तैरुत्पाद्योद्यमं तेने जनानुत्प्लाविनो युधि ॥54॥

एवमाहितजनाग्रनायका साऽभवज्जयरमाविधायिका।
जातघोषणनभोऽवरोधिनी सातवाहनमहावरूधिनी॥55॥

गद्यम् - इत्थमुत्थितयुद्धोत्सवनवनवविशङ्कनविसरदिशदनुक्षणसैनिकशिक्षण-
क्षुण्णसमरपाण्डितीशौण्डदण्डनाथमण्डलाचारयदुदयकालिव सैन्यविन्यासैः
सेनानिवेशभूपरिसरैरभिभासमानः, अभ्यासैकरसिकपारशीकजवनाविकदला

In Public domain. Digitization Muthulakshmi Research Academy

वली निकरविकिरत्खुरचन्द्रकोपन्यासिनगरालिन्दमन्दुरावृतवसुन्धराभिरभिनन्द्यमानः; स्थानामपि ग्रथिताग्रभागभाजिवैजयन्तविहृतविहायसानां सहायसाभिनवनेमिकान्तिभिस्संक्रान्तचित्रितचित्रवर्णैरभिवर्ण्यमानः, घटानिटलतटघटितरटत्किकिणीमणीघृणीविमिश्रणद्विगुणीभवत्सीधुश्रवद्धारासहस्रलेहनदोह-लमिलिन्दायतप्रवाहनिवहजायमानकलिन्दजायमानशङ्काकुरपङ्कांकितालानपङ्किकालङ्कृतवाटिकाभूतिभिर्विद्योतमानः, समन्ततस्सामन्तपरिवारसञ्चारसम्मर्दोद्दण्डः "पिथुण्ड" आसीत्॥ अनन्तरे मौहूर्तिकसुनिश्चिते शुभेऽहनि शौर्यखनिश्श्रीमुखसातवाहनभूजानिः प्रकटीकृतजैत्रयात्रानेहस्युषसि विपुलतरमुपस्कृतकपिलगोवाजिगजायुधपूजां पुरोवर्तिपुरोहितविहितविधं विधाय, श्रृङ्गारवतीश्रृङ्गारितगृहाङ्गणरङ्गन्मङ्गलरङ्गवल्लीवेल्लतावनौ पुरस्सरद्वगमरमधुरमधुरसोपमपवित्रस्वस्तिवाचनैस्तौर्यत्रिकमङ्गलसङ्गीतसङ्गतैः पार्श्ववर्तिमन्त्रिसामन्तराजबन्धुरै राजबन्धुभिश्च परिवृतः परिष्करणभद्रभद्रकुञ्जरमधिरुह्याऽर्णः पूर्णसुवर्णकुम्भसंभृतपूर्णेन्दुमुखीभिरभि-मुखमागम्यमानः, पुराग्रगोपुरस्य पुरः प्रवेशमाससाद। तत्राग्रे मदोद्ग्रवेदण्डमण्डली, तत्पश्चाद्वल्गनासङ्गतुरङ्गपङ्क्तयः, तदनु मदनिर्वेल शौर्योदात्तपत्तिविसरः ददनुसारि प्रसारितायुधरोचिस्स्यन्दिनस्स्यन्दनश्रेणयश्च स्थित्वा किञ्चित्पश्चात्प्रक्रम्य तेषु पुनः पुरश्चलनोद्यमनेन विद्यमानेषु॥

आदाय क्षितिनायकस्य कृतवत्स्त्राज्ञां भटेषूद्भटं
'दिग्दन्तिश्रुतिमेदनो जनमनोदिग्भ्रान्तिकृद्दन्तुरः।
मेरीभूरिभयाङ्कभांकृतिभरो भूमिं नभोमण्डलं
भूयो भूय इयाय तज्जयजययेत्युच्चैर्महाघोषणैः॥57॥

व्रजगजपदाग्रजं शरदमध्यकार्षीद्रज-
स्सरत्तुरगवल्गनक्रमटत्खुराडम्बरः।

In Public domain. Digitization Muthulakshmi Research Academy

पदात्यसिवदातरुग्ध्वद्वनिरपि प्रधावद्रथै-
स्तटित्ककरकारवद्युपदकर्षिवर्षागमम्॥58॥

चमूमुखाग्रेऽभिमुखं यथासुखं वचोभिरश्रावि शुमैरुपश्रुतिः।
पयस्विनः पूर्णघटास्समाययुस्सयष्टिरायाच तुरीयवर्णजः॥59॥

अरात्सरन्ती नरनाथवाहिनी विलोकयल्लोचनवीथिमोहिनी।
महीसुतासत्पदरेणुपावनीमवाप गोदातटिनीतटावनीम् ॥60॥

सुहृद्भिरुत्तीर्य धुनीमनीकिनीमनेकनौभिर्विशुरप्यतारयत्।
पटैः कुटीरान्निरमापयच्च तच्चमूनिवेशानपरे स रोघसि ॥61॥

परीक्ष्य सेनाश्शिबिरे दिनात्यये यथासुखं तत्र निवेशितास्स्वयम्।
विनोदितस्सत्कविभिर्निजोचिते निवेशदेशे रजनीमजीगमत् ॥62॥

प्रभातकाले सुकुमारमारुते प्रबुध्य गोदाम्बुशकुन्तनिस्स्वनैः।
उपान्त पुष्प्यद्गिरिमल्लिकावहां विगाह्य वेणीं बहुदानमानित॥63॥

अपूर्वमुक्तैरटवीक्षुमौक्तिकैर्निपूरितान् कुञ्जरदन्तसम्पुटान् ।
उपाहृतानेत्य वनेचरैर्विभुः पुनः प्रतस्थेऽपर दिङ्मुखं बलैः॥64॥

चमूसमूहादुपघातशङ्कितः पथीनपक्लीपददूरतो बलम्।
प्रचालयन्वानरपातिताटवीकपित्थगृह्णद्विपसैन्यमोदितः॥65॥

स तत्र रात्रिं निकटस्थितेऽनयद्वसन्विशाले स्वविलास मन्दिरे।
महीविलोपात्तमधुद्रवोन्मिलन्मनोज्ञमोचाफलसङ्ग्रसद्भटः॥66॥

उषसि प्रययौ ततस्ससैन्यः पृथिवीन्द्रः पृथुलाटवीविभागे।
मधुराणि वसन् पथि प्रपश्यन् मृदुनृत्यानि पुलिन्दकन्यकानाम्॥67॥

In Public domain. Digitization Muthulakshmi Research Academy

नृपतिस्सदलः पुरस्सरन् विपिने मेचकपर्वतावृतेः।
बलभीतिसरत्प्रपुण्डरीकानतिचक्राम वनं स संहरन्॥68॥

चतुरङ्गबलैस्स तत्र कृष्णां पुनरुत्तीय नगान्तरेषु गच्छन्।
पुरमञ्चितगौतमीस्रवन्तीनवनासामणिमाप नाशिकाख्याम्॥69॥

प्रविभज्य चमूमुखं द्विधा नगरे त्रयम्बकनाशिकाह्वये।
नृपतेर्बलमग्रहीद्धठात् विहगाण्डे द्विफणः फणी यथा ॥70॥

गतसारमकारि तच्चमूमुखसंरोधि विरोधिनां बलम्।
तिमिमीन इवातिविस्तरे विवृते घोरतिमिङ्गिलानने ॥71॥

दृतं ततश्श्रीमुखसातवाहनक्षितीन्द्रसेनाः परितः प्रसारिताः।
महामहाराष्ट्रमहीविभासुराः पुरस्समस्ता जगृहुर्निमेषणात्॥72॥

रणे च तत्रान्ध्रपुलिन्दनायकागुणग्रहप्रेषिततीव्रसायकाः।
रिपुप्रपूर्णाम्बुधिमध्यमन्दराः परं बभूवुर्जनयज्जयेन्दिराः॥73॥

भूपतिरेवं स्वदलैरारेव व्याप्नुवन् महाराष्ट्रे।
रिपुकुम्भिकुम्भमुक्ता जयश्रियः परिणयेऽक्षतांश्चक्रे ॥74॥

रठिकादिमहीकान्ताः पादाक्रान्तास्तमन्ववर्तन्त।
पादाक्रन्तानि रविं सूर्यावर्तीनि नवसुमानीव॥75॥

गद्यम् - एवं स धात्रीपतिर्महाराष्ट्रधरित्रीपतिभिर्मन्त्रीमधिगम्य तत्रैव कतिपय वासराण्युवास। अवसच्च तस्मिन् जैत्रयात्रान्तरे श्रीमुखभृश्वजोऽनुजो दक्षिणभुज इव स्वेन साकमवार्यशौर्यधुर्यस्समरपाण्डित्यलक्ष्मीसमाकृष्टश्श्री कृष्णसातवाहश्च। तस्मिन्नान्ध्रमहाराष्ट्रमहीनाथमित्रकुटुम्बे मित्रकुटुम्बे सूर्यमङ्गारक इवोदारतर "स्त्रणकैरु" नामा महारठिराजवंशशेखरश्रीमुखमखर्व-

In Public domain. Digitization Muthulakshmi Research Academy

सख्येन सुमुखीकृत्य नित्यमत्यन्तसन्निहितभावोऽतीवतत्प्रेमवैभव-मनुबभूव ॥76॥

वनानि रम्याणि गिरीन्मनोहरान् सुगलयानद्भुतशिल्पकल्पनान्।
स्वमित्रभूनाथजनोपदर्शितानवेक्षमाणोऽन्ध्रधरामनोहरः ॥77॥

स नर्मदाकूलकुडुङ्गमागधीकनन्मनोज्ञानिलसेवितो हितैः ।
स नर्मभाषैरवसत्तदा पुनः पुनर्महाराष्ट्रपदे विनोदितः ॥78॥

गद्यम् - एकदा एकान्तसमये महारठित्रणकैरुस्सौन्दर्यजिताप्सरः कुरङ्गालोकां "नागानीकां" निजनन्दिनीमान्ध्रराजनन्दनाय वयस्तेजोगुण सुरूपाय कन्यानु रूपाय पूर्णविद्यार्णवाय श्रीशातकर्णये दत्वा चिकीर्षुः पाणिग्रहोत्सवं, श्रीमुखाय राज्ञे व्यजिज्ञपत्। श्रुत्वा चैतद्विज्ञापनमनोज्ञरूपसौशल्यामूल्यगुणाभरणभूषितां, योषितां समुदये नवोदय कल्पनामल्पसृष्टिरिवि स्रष्टुरनन्यलावण्यधन्यां, त्रणकैरुरराजकन्यां सौजन्यमन्येति जनैश्श्रुत्वा, अपि च दृढीकरणाय स्वराष्ट्रस्य, महाराष्ट्रपतिभिरशैथिल्यबन्धं बान्धव्यं चिकीर्षुः साभिला, तां स्नुषामिवाङ्गीर्तुं सुमुखश्श्रीमुख आसीत् । ततः त्रणकेरुजनवल्लभतल्लजस्स्वजनमादिदेश स्वदेशस्याशेषस्योपस्करणाय ॥79॥

अलम्बयन्मौक्तिकमालिका गृहेष्ववासयद्गुग्गुलुधूपतः पुरीः।
अकारयच्चन्दनचर्चितां महीं स्वकन्यकोद्वाहमहोत्सवे नवे ॥80॥

हितैस्समाहापयदाप्तबान्धवांस्तताञ्चितैर्गानचणैर्व्यनोदयत् ।
सुगन्धपुष्पादिभिरप्यपूपुजत् कुलागतान् देवगुरूनभोजयत् ॥81॥

वरेण सश्रीपदशातकर्णिना सहान्ध्रदेशागतराजबान्धवाः।
बभुश्च कन्यामणिदातृबान्धवा विलीय पूर्वापरवार्निधी इव ॥82॥

In Public domain. Digitization Muthulakshmi Research Academy

विहिते महिते पुरोधसोभिस्त्रणकैरुस्समये निजे निकाय्ये।
बहुबान्धवबन्धुरेन्दुरत्नस्थगितालङ्कृतचन्द्रशालिकायाम् ॥83॥

शशिमङ्गलरङ्गवल्लिकासुषमावर्णितवेदिकोपरि ।
नवरागवधूवरात्मनोः प्रतिमानेऽम्बुजरागघृष्टिनि॥84॥

दशपरितरणाय नौदलानां दशदशपूर्वपरान्वयोद्भवानाम् ।
अपि हयगजवाहनानि भव्यान्युपचरणाय वराय सन्ददानः॥85॥

सदलङ्करणाभिशोभितां तनयामात्तनयां वराय सः।
श्रुतिमङ्गलगानबन्धुरे प्रददौ बान्धवसन्निधौ नृपः॥86॥

स्वरमार्ग इव श्रुतिं गतः कविवाणीव कनद्रसान्विता ।
समुपेत्य वरो वधूममुं रठिकेन्द्रस्य सुताप्यशोभत ॥87॥

मृदुमृष्टसुभोजनादिना मुदिते भूसुरबान्धवव्रजे ।
गतवत्यतिमात्रकौतुकं कृतपुण्याशिषि शोभना वधूः॥88॥

सहकारवनेषु सप्तलासहितानेकसुगन्धवादिषु ।
विजहार मनोहरेण सा सहपन्नीरसरोवरेषु च ॥89॥

स वरो वरसाप्ततन्त्रिकास्ववधूरत्नविपश्चिकारुतिम् ।
सविनोदममंस्त सप्तधा गतिमान्म्रेष्विव गौतमीनदीम्॥90॥

स वधूनिबिडस्तनान्तरे व्यलिखच्चन्दनपत्रवल्लरीम् ।
स्वभृतान्ध्रमहीमहेन्द्रदिङ्गमध्याक्षपदीसधर्मिणीम् ॥91॥

मणिश्रृङ्गहिमाम्बु सुस्मिता स्फुटनेत्रे व्यकिरत्प्रियामुखे ।
तदभावि समीरशीकरं शतपत्रं धवलं दलद्दलम् ॥92॥

In Public domain. Digitization Muthulakshmi Research Academy

स वधूमधुरालकालिके प्रियमुन्मृज्य कराङ्गुलीनखैः।
उदयत्किरणारुणद्युतिं ललितार्धेन्दुकलामरूपयत्॥93॥

लतिकासु किशोरकोरकश्रितपुष्पासु निगूढमास्थिताम्।
स न वेद विनोदिनीं वने सुतनुं तां सुदतीं सुहासिनीम् ॥94॥

स मधौ मधुवृक्षमण्टपे सवधूश्चन्द्रनगे च माधवे।
नभसि स्फुटमालतीगृहे मधुरं प्राप सुखं मधूपमम् ॥95॥

अयमत्र नवोढयाऽनया निवसन्नान्ध्रकुमारभूपतिः।
जनकेन नियोजितो जितक्षितिरक्षाकरणे शरद्द्वयम् ॥96॥

अथ तस्य पितुर्निदेशतः पृथिवीं प्राप्य निजा सुशासतः।
श्वशुरप्रतिपन्नवाहिनीरमणीहारमणीसमायुतः॥97॥

प्रसृतां स महाराष्ट्रादान्ध्रायैवात्तजीवनाम्।
सेनां नीत्वा सुखेनासीत् स्वदेशे गौतमीसमाम्॥98॥

नवमालतीसुमालालम्बितवेणी सहासमुखसुरभिः।
पालाशपट्टवसना माता कामेश्वरी सदा पातु नः॥99॥

इति श्रीमदुभयभाषासनाथद्विभाषि सोमनाथकृतौ
राजरत्नमालायां प्रथमं रत्नम्॥

****

In Public domain. Digitization Muthulakshmi Research Academy

द्वितीयं रत्नम्

श्री कामेश्वर्यै नमः ।

द्विभाषि सोमनाथकृता श्री राजरत्नमालाचम्पूः

त्वत्करकीरेण समं मामनुपाल्योक्तिशिक्षणं कुरुषे ।
काव्येऽस्मिन् रचनायाः पूतौ कामेश्वरि त्वमेवासि ॥1॥

श्री मुखोऽथ जयन्तश्रीहरियुक्तो हरिर्यथा ।
श्रीसातकर्णिकृष्णाभ्यां युक्तो वैभवमन्वभूत्॥2॥

एकदा स धराधीशस्तुङ्गभावैकमानसः
अनेकदानधाराभ्रगङ्गाहिमनगोपमः ॥3॥

पलिते शिरसि स्वमानसे फलिते पूर्वनरेन्द्रसन्निभः ।
इह भोगरतौ भवन्नसौ विमुखश्श्रीमुखराजशेखरः ॥4॥

मतिमानिति वीर्यवानिति, स्थितिमानित्यपि कृष्णमार्जवे ।
प्रतिपालयितुं च नन्दनं युवराजं स चकार सोदरम् ॥5॥

गद्यम् - एवमतिमात्र सौजन्यमान्योऽयं राजमूर्धन्यौ गुणगण्यौ सौदशात्मजो दृष्ट्वा धन्यमिव मन्यमानस्तदीयप्राज्यमहासाम्राज्यपालने कृष्णसोदरं नियुज्य सुकुमाररमाकरं स्वकुमारं तत्करे निधाय निजकुलाचारमनुचरन् तपोवनं अयासीत्। ततश्च- ॥6॥

देवांशो मधुरोदयः पदनखक्षिप्तारिचक्रोद्धति-
र्दीक्षारक्षितगोगणो नगधृतिस्तुष्यद्बुधेन्द्रव्रजः।
प्रेमानुस्थितलक्षणो विजययुवसंग्रामसीमाञ्चितः
कृष्णः कृष्ण इवान्वशान्निजभुवं कृष्णद्विरोधिप्रभः ॥7॥

In Public domain. Digitization Muthulakshmi Research Academy

पुष्पाणामतिमार्दवं हिमरमाशैत्यं शशिह्लादिता
रत्नानामनुरञ्जनं शुचिरसो गङ्गातरङ्गाम्भसः ।
म्लानिं हैन्यगुणं च शापनिहतिं कार्कस्यदोषच्युती
त्यक्त्वाऽऽसन्निति कृष्णराजहृदये सल्लापितं सज्जनैः ॥8॥

इन्दुस्स्यादकलङ्कितो घनयशाः कर्णोप्यदुष्टाश्रितः
विध्याऽगोऽयमगर्वधूर्वहमना विष्णुस्त्वभामायितः ।
आह्लादिद्युतिदानधैर्यविभवेष्वित्याचतुस्सागरं
जातस्तस्य यशोमयः कविवचः प्रञ्चद्विपञ्चीध्वनिः ॥9॥

सोदरादुपगतं यशोधरः प्राप्य धीगुणरसो धरातलम् ।
मेदुरामुरुदलैश्चकार तां मेदिनीं वसुधनैस्स मेधिनीम् ॥10॥

अविनयनयशिक्षात्तासिधाराव्रतज्ञो
गगनकुसुमतुल्यां शत्रुकीर्तिं प्रकल्प्य ।
रणभुवि परिणीतां कीर्तिलक्ष्मीमकार्षी-
दभिरुचिकृतमैत्रीं भद्रभद्रश्रियाऽयम् ॥11॥

गद्यम् - ईदृग्विधमुदारमानसे श्रीकृष्णशालिवाहनमहीपतौ क्षितिं पालयति, निर्मलधर्माचार सुन्दरायां तस्यां वसुन्धरायामनीतिवर्जनाद-नीतिमाप्नुवन्तस्स कलसुखरीतिं तस्य भक्तिप्रीतिनुतिक्रियामनोरञ्जना जना भभूवुः। एवं स दशवर्षपरिमितं राज्यं कृत्वा, सहजपराक्रमक्रमतुलितकुमारे सहोदरकुमारे गुणकथामृतस्यन्दसन्दानितप्रजाकर्णे श्रीसातकर्णौ लसति तं धराधुराधरणदीक्षाविचक्षणमिव विदित्वा तस्य राज्याभिषेचने कौतुकरमा-सेचनानि लोकलोचनानि सन्तर्पयितुं समृद्धिरमानिरवधिमधिरोहयितुं भद्र-पीठिकां शुभग्रहवीक्षणविलासमयं किञ्चित्समयं प्रकटीचकार। तदानीं तु ॥12॥

 In Public domain. Digitization Muthulakshmi Research Academy

मुकुरमुकुटिताऽऽसीत् श्रीधरा सौधराजि-
मरकतमणिमालामन्दिरालिन्दलक्ष्मीः ।
पुरि परिणतशोभाकन्दलानन्दलास्ये
वियति च नवमुक्तामञ्जरीमञ्जुरोचिः ॥13॥

भवनशिखररेखारत्नदीपावलीभिः
प्रतिफलितवतीभिर्गौतमीनिम्नगायाम् ।
बहुरुचि पहिताभिश्शर्वरीष्वप्यपूर्वा
नभसि शबलितेन्द्री कार्मुकश्रीरदर्शि ॥14॥

गद्यम् - एवमुपस्कृतसुषमामनोरमायां राजधानीनगर्यां बहुविद्वज्जनमन्त्रि सामन्तसमक्षं सभाधनभवनाग्रसीम्नि साम्ना प्रतिध्वानितावनौ (गीयमानावनौ, सिंहपीठे तेजोजिताहिमांशुवर्णं **श्रीशातकर्णिं** (मुप) वेशयित्वा श्रीकृष्ण शातकर्णि राजेन्दुरक्षपादपादस्पर्शपावनाभिः कल्याणगुणाधाराभिर्गोदावरीवारिधाराभि-रभिसिषेच ॥15॥

तदा च-

अभिनवमभिषेकस्वातिवर्षे प्रवृत्ते
सरसहृदयशुम्भत्कृष्णमेघप्रयुक्ते ।
समिति जननदाढ्ये नव्यराजेन्द्र सिन्धौ
प्रमदसलिलमुक्ता नेत्रशुक्तिष्वभूवन् ॥16॥

गद्यम् - एवमावहति महीं महीयसि नवराजनागेन्द्रचूडमणौ ॥17॥

अर्थीमत्वर्थितोऽभून्महिरपि विबुधै रत्नगर्भा विशिष्टा
धात्रीनामा च सस्याधिकफलकलना पुष्यमाणप्रजाभिः ।
गावो गोदादिनद्यस्सृतमधुरपयःपुष्कला नित्यमासन्
तस्य श्रीसातकर्णेरनुसरदुदयैरुज्ज्वले राज्यकाले ॥18॥

In Public domain. Digitization Muthulakshmi Research Academy

शीतज्योतिरिनस्सुगन्धिलगुणो हेमाचलेन्द्रोऽर्थिनां
वाङ्मित्वे फणिकान्त एकरसनस्तत्वे विधिस्सत्त्विकः ।
पुम्भावैकसरस्वती बहुकलासाहित्य विद्याविधौ
लोकानां समदृष्टिरेव गुणवांस्तद्राजचूडामणिः ॥19॥

गद्यम् - सर्वेषां गुणगणानां विषये प्रायस्तं श्रीसातकर्णिमनन्वय एवालङ्कारोऽन्ववर्तत । तस्मिन्नेव समये ॥20॥

राजानं तं नवं वीक्ष्य भारवेल्लः कलिङ्गराट्।
बहुधान्ध्रीं (ध्रं) समाधातुं युध्वा तेनाऽऽस निष्फलः ॥21॥

गद्यम् - तदानीं तु ॥22॥

रसाकरे पुष्पपुरे बृहद्रथो महीपतिर्मागधराजवंशजः ।
बभूव राज्यालसभोगलालसः प्रभूतभूमानवहावमानसः ॥23॥

हितकारि सतं सभामुखादप्यभवत्तस्य वधूमुखं मनोज्ञम् ।
निजनामविलेखनाच्च पत्रोपरि कान्ताकुचपत्रलेखनं, च ॥24॥

भयहेतुरभूच्च मन्त्रिवर्गस्स्वचमूनायकपुष्यमित्रयुक्तः ।
अधुना प्लवपुष्यमास्यमाष्टग्रहकूटो विधिनेव राज्यलक्ष्म्याः ॥25॥

कृतकानि कृतानि रूप्यकाण्युरुचौर्याणि विश्रृङ्खलानि च ।
बहुजारकृतान्यनर्गलन्यभवंस्तन्मगधावनीतलम् ॥26॥

कर्षको न ददौ सस्यभागं भूस्वामिनोऽकरोत् ।
नाप्यधीनां भुवं तस्य देश एवमराजके ॥27॥

नातन्वन्राजकार्याण्यधिकभृतिसमाकांक्षिणो ग्रामपालाः
कार्यस्थानेषु भृत्या व्यपगमितभिया नाप्यकुर्वन्स्वकार्यम् ।

 In Public domain. Digitization Muthulakshmi Research Academy

सङ्घीभूताः प्रजौघा विविधकरधनं नो ददुर्भूमिभर्त्रे
किं स्यादेवं स्वदेशे बहुमतजनतानायके राज्यतन्त्रे ॥28॥

संस्कारव्यपदेशात्कवयश्च्युतसंस्क्रियास्स्वभाषायाम् ।
मतवैषम्याद्वर्णाश्छिन्ना भिन्नास्तदाऽभवन्मगधे ॥29॥

अथ तत्र दलावलीपरीक्षाव्यपदेशेन पुराद्बहिर्नृपालम्।
उपनाय्य जघान दण्डनाथस्तमतिक्रौर्यमुपेत्य पुष्यमित्रः ॥30॥

स ततः पृथिवीन्द्रराज्यपीठं दृतमाक्रम्य कुमारमग्निमित्रम् ।
अकरोद्युवराजपट्टभद्रं विदिशायां मगधोपराजधान्याम् ॥31॥

गद्यम् - एवं मगधसाम्राज्ये पुष्यन्मित्रमात्रस्य पुष्यमित्रस्य हस्तं गते सत्यस्तङ्गतशोभाविलक्षणक्षणक्षणक्षीणराज्यलक्ष्मीः कृष्णपक्षक्षपाकरकलेव निस्तेजस्का बभ्रुव ॥32॥

निर्णीतिः पालको वर्गः नीरसा कवितावनी ।
निस्सीमपाप्म तत्रास्मान्निर्गतिः प्रायशोऽभवत् ॥33॥

गद्यम् - तदानीं तु मगधोपराजधान्योरन्यतरस्या विदर्भानगर्याः पालको बृहद्रथसामन्तः पश्यन्नेतद्दुरन्तमुत्पातं यज्ञसेननामा दुष्यत्प्रजामित्रं पुष्यमित्रमाहवे हन्तुं निश्चितमनास्तत्प्रतिघटनसमये स्वदेशाभिरक्षणाय मगधतुल्यप्राबल्यसाम्राज्यचक्रवर्तिनं विक्रमसमविक्रमं आन्ध्रमहाराज्यमुद्रा पट्टभद्रं परिपूर्णवीररसार्णोराशिं श्रीशातकर्णिं सहायमभ्यर्थयाञ्चकार ॥34॥

प्रतिभाप्रतिभासशातकर्णिर्जितवीरोऽप्रतिवीरवीर्यधुर्यः ।
कृतदुष्कृतमीक्ष्य पुष्यमित्रं प्रतिकर्तुं निजधर्मतोऽनुमेने ॥35॥

In Public domain. Digitization Muthulakshmi Research Academy

विज्ञस्स विज्ञापयितारमीशस्तं यज्ञसेनं बहु मन्यमानः।
अदाद्विदर्भापुरगुप्तयेऽश्वान् मदोत्कटं दन्तिभटं सहस्रम् ॥36॥

गद्यम् - अपि च स यज्ञसेनं रहस्यामन्त्र्य - ॥37॥

अनपायोपायज्ञस्तं प्रैरिरदग्निमित्रमभियोद्धुम् ।
विदिशोपराजधानीनवराजं पुष्यमित्रयुवराजम् ॥38॥

गद्यम् - अथैवं तं प्रेरयित्वा प्रेषयति श्रीशातकर्णौ - ॥39॥

विदर्भावनसन्दर्भेष्वदभ्रे प्रेषिते दले ।
यज्ञसेनाग्निमित्राजिदुर्दशे विदिशापुरे ॥40॥

भिन्नैः कुम्भीन्द्रकुम्भैर्बहुरुधिररसोद्गुम्भनारम्भडम्बै-
र्भिन्नप्राकारमध्यप्रपतदुरुपुरद्वारसौवर्णकुम्भैः।
गम्भीरध्वानढक्कातृटनपरिलुठत्कांस्यलोहोरुकुम्भै-
स्तत्राऽऽस त्रासकारि क्रमतुमुलयुता कुम्भिनी सार्थकाख्या ॥41॥

इत्थं वीररसाञ्चितमिद्धं विदिशापुरे स्थितं युद्धम् ।
श्रुत्वा स पुष्यमित्रः पुत्रं रक्षितुमुपात्तदल आयात् ॥42॥

साङ्गस्सङ्गररङ्गो रङ्गद्विडभङ्गकोपभङ्ग्याऽऽसीत्।
घोटकखेटककृतभटनाटकरथदन्तिदन्तुरस्तत्र ॥43॥

गद्यम् - तस्मिन्नन्तरे समयज्ञश्रीशातकर्णिर्मगधराजपाल्पमानस्य मालवस्य राजधानीमुज्जयनीं सकलसमिज्जयनीरन्ध्रैरान्ध्रसैन्यैराक्रम्य, - ॥44॥

तत्रत्यां मागधीं सेनामगाधायां सुतेजसा ।
स्ववाहिन्यां महाशौर्यप्रवाहिन्यामलीनयत् ॥45॥

 In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् - आक्रम्य च तद्राज्यपीठं विक्रमोपशमितशत्रुचक्रो "विक्रमो ऽयमपरः" "किमुत त्रिविक्रमो वा" "शक्रो वे त्यालप्यमानस्तज्जनै, र्जनयत्कौतुकं क्षितिधूर्वहणविश्रमितदिग्दन्तावलस्सन् मालवं तस्मिन् पालयति, ॥46॥

हत्वाऽथ यज्ञसेनं श्रुत्वौज्जयिनीप्रवृत्तिमपि तत्र ।
स तु पुष्यमित्र आप, क्रोधात्स्वकुमारनामपर्यायम् ॥47॥

युधे विभज्य त्रिविधं स सैन्यं प्रणीततत्तपुरनामधेयम् ।
एकेन तत्र प्रजिघाय रक्षन्नुभे विदर्भौज्जयिनीनगर्यौः ॥48॥

तत्परिजानन्नान्ध्रक्षितनाथश्शौर्यवांस्तथैवासौ ।
रक्षन्नुज्जयनीं स्वां प्राहैषीद्दलमपि त्रिधा कृत्वा ॥49॥

विदिशायां विदर्भायां विशालायां च विक्रमात् ।
विश्रुता उभयोस्सेनाः प्रापुर्युद्धं त्रिधा गतः ॥50॥

त्रयोऽग्नय इवोद्दीप्ते पौष्यमित्रे दले त्रिधा ।
तच्छमान्ध्री त्रिधा सेना त्रिवेणीसमतां गता ॥51॥

एवमुत्थितरणे महोद्धते तत्पुरेषु मगधान्ध्र सेनयोः ।
संस्मृतस्त्रिपुररङ्गसङ्गतस्सङ्गरोऽसुरसुपर्वसेनयोः ॥52॥

अन्योन्यं विविधदलैरन्यूनं त्रिविधरङ्गयुतसैन्यम् ।
गणितं त्रिभुजमिवासीत्समसङ्ख्यं समभुजैश्च संवृत्तम् ॥53॥

गद्यम् - त्रिषु नगरेष्वेवं कतिपयवासराणि महासङ्गरे प्रचलति - ॥54॥

विक्रमजृम्भितसैन्यैर्बलिमिव कुर्वन् रणेषु रिपुसैन्यम् ।
स महांस्त्रिलिङ्गभूपस्त्रिविक्रमश्शातकर्णिरपरोऽभूत् ॥55॥

In Public domain. Digitization Muthulakshmi Research Academy

उज्जयिनीसमरेऽभूद्दृष्टिस्तत्रत्य कालिकाधिपतेः ।
सव्याऽऽन्ध्रराजसैन्ये सव्याजा मगधनाथसैन्ये च ॥56॥

गद्यम् - एवमुज्जयिन्यां सम्पादितविजयलक्ष्मीसनाथे शातवाहनान्ध्रमहीनाथे - ॥57॥

उज्जयिनीहतशेषां निजसेनां प्रतिनिवर्तयन्नथ ताम् ।
केन्द्रीकृत्य विदर्भापुरसमरे पुष्यमित्रभूनाथेन ॥58॥

युद्धयति सति तत्रापि प्रैषिष्ट दलानि शातकर्णिरपि ।
दृतमुज्जयिनीनगरात् कतिपयसैन्यैः पुरं च तां रक्षन् ॥59॥

गद्यम् - अनेन विधानेनापारपारावार इवोभयोस्सेनयोस्सङ्गराकारे घोरे सति, - ॥60॥

स्वबलस्य शातकर्णिः प्रबलीकरणाय झटिति विदिशायाम् ।
उपरम्याऽजिं सेनास्तत्रैवोपानयद्विदर्भायाः ॥61॥

गद्यम् - पुष्यमित्रेऽपि तत्कृतिमनुकृतवति, - ॥62॥

विदर्भखण्डस्तत्रऽऽसीत्सैन्ययोस्समयोर्द्वयोः
मध्येऽयस्कान्तयोर्लोहस्सममाकर्षतोरिव ॥63॥

उज्जयिनीपुरकेन्द्रं विदिशापुरकेन्द्रमान्ध्रमगधेशौ ।
प्रेश्य विदर्भाकेन्द्रं गुरुशुक्राविव गतौ विरोधयुतौ ॥64॥

हरिहरसङ्गरसाम्यं कुमारभृगुरामयुद्धसाधर्म्यम् ।
प्राप्य समरश्चकासे विप्रतिषेधेन शब्द इव च तयोः ॥65॥

पूर्वापरकार्यत्वं विप्रतिषेधे यथास्ति शब्द विधौ ।
उत्तरदक्षिणभागौ वैदर्भौ मागधान्ध्रयोर्जातौ ॥66॥

 In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् - इत्थं युद्धेन भिन्ने विदर्भदेशे - ॥67॥

वरसस्यफलप्रदायिनी वरदा यत्र भुवं प्रवाहिनी ।
प्रविभज्य सरत्यभूत्तयोरवधिस्तत्र रणात्ततद्भुवोः ॥68॥

गद्यम् - एवं निरणायि समरकृतसन्धिकार्यं; आन्ध्रमागधयोर्वसुन्धरानाथयोः परस्परं, ततः - ॥69॥

एवं च दक्षिणविदर्भमसौ विशाला-
माशालसन्निजयशःप्रसरोऽन्ध्रराजः ।
प्राप्याऽथ सर्वधरणीन्द्रकिरीटराजि-
नीराजितांऽघ्रिसरसीजविराजितश्रीः ॥70॥

अध्यापयन्निखिलवेदसमस्तशास्त्रा-
ण्याचारयत्तदुपलक्षितधर्मसूक्ष्मान् ।
आवासयच्च सुखदायि महोदयायौ
प्रायस्स राण्णिजभुजाजितभूमिभागे ॥71॥

देशे सर्वत्र यज्ञेषु कारितेष्वान्ध्रभूभुजा ।
च्छिन्नदर्भो द्विजव्रातैर्विदर्भस्सार्थकोऽभवत् ॥72॥

नगरालिशिरोविभूषणं नगजानाथकनत्कृपापणम् ।
नवरम्यविलासदर्पणं स चकारोजयिनीं कलापणम् ॥73॥

नवपण्डितरत्नसम्मिता समितिर्विक्रमपालनेन या ।
नवपण्डितरत्नकोटिभिर्नमिता सुक्रमतोऽस्य पालनात् ॥74॥

गुणरूपगुणानुवृत्तिभिर्मणिभिर्मानसरागमूर्तिभिः ।
निजवृत्तिमिषप्रदीप्तिभिस्स महाकालमुमामसेवत ॥75॥

In Public domain. Digitization Muthulakshmi Research Academy

अचिरात्स्वगुणाब्जमालिका निचिता मञ्जुलगानरूपिणी ।
नगरप्रमदा विपञ्चिका मणिसोपानसरत्सरस्वती ॥76॥

तृणकाष्टजलाभिवृद्धयस्स कलग्रामसमीपभूमयः ।
बहुसस्यफलो नदीजलैः वरकेदारगणोऽस्य पालने ॥77॥

प्रतिकेलिवनं च नन्दनं शिथिलग्रामटिका च गोकुलम् ।
नगरं नगरं प्रसाधनैरभवद्वारवतीपुरोपमम् ॥78॥

कवितालतिका तता नवस्फुरिता पल्लविता च रागिणी ।
मृदुगानकला तथा नवस्फुरिता पल्लविता च रागिणी ॥79॥

शौर्यसनाथस्सोऽन्ध्रक्षितिनाथो रिपुमहीं विजित्यैवम् ।
संस्थाप्य तत्र तत्र स्वकीयमधिकारमात्मपुरमेत्य ॥80॥

दिग्दिगन्तगतकीर्तिवल्लिकां तामवन्तिमहिमौलिमल्लिकाम् ।
भारतीयनगरीमतल्लिकामुज्जयिन्यभिहितां तथाम्रुवन् ॥81॥

विक्रमार्कप्रभोः पीठं विक्रमार्कप्रभस्स राट् ।
प्राप्तस्तदाजिचिह्नाय राजसूयं चिकीर्षितः ॥82॥

अक्षीणशौर्यरक्षितदक्षिणभारतमहाक्षितीशतया ।
निक्षिप्त "दक्षिणापथपत्यक्षतचक्र" लक्ष्मयुगलक्ष्यः ॥83॥

एकवीरो महान् शूरस्सौरिर्दाने शुभौजसि ।
सूरश्शौरिर्दयावर्णे शातकर्णिर्द्विजेडितः ॥84॥

सदनेऽहसि तत्क्रतूचितायां सदने पर्णचिते पुराग्रभूमौ ।
सदनेकसदस्यसर्त्विजायां सदसि सृक्सृवदीप्तवेदिकायाम् ॥85॥

 In Public domain. Digitization Muthulakshmi Research Academy

महिताहवनीयमिद्धमन्तर्महितं चऽऽहवनेय शौर्यरूपम् ।
विहितं विधिना निधाय जायासहितस्सोऽर्थिहिताय यायजूकः न ॥86॥

अकलङ्कितवृत्तवेदविप्रैरखिलश्रौतपथोक्तकर्मदीप्तैः ।
नृपसूयमहाध्वरं स सम्राडुपचक्राम सबान्धवस्समित्रः ॥87॥

महिषी गृहतापसी पदाढ्या चरितब्रह्मशुभव्रतैकचर्या ।
अनुसृत्य तमध्वरान्तरे सा निजपत्नीपदमर्थवच्चकार ॥88॥

विरजासमगौतमीस्त्रवन्त्या विरजा दूरसमागतो जनौघः ।
क्रतुभोजनभुक्प्रियामृतानैः क्रतुभुक्तुल्य पवित्रातमवाप ॥89॥

सघनं यजुरुच्चकैः पठद्भिर्मधुरं साम सहेलमालपद्भिः ।
ऋच उक्तपदक्रमौ वदद्भिश्रुतिविद्भिर्ध्वनितान्भ्रराजधानी ॥90॥

अभवन्नवलाङ्गालिछदालीकटपंक्तावुपविश्य यज्ञवाट्याम् ।
कृपया व्यपनोदिनो गवीनां गलकण्ड्वाश्रुतिशिक्षका वटूनाम् ॥91॥

निस्सरद्रवमुखैश्शिशुप्लुतैर्णातिदीर्घमधुरास्पुटारवैः ।
रज्जुबन्धनकृतेऽपि चावशेर्हृद्यनोदिमखधेनुतर्णकैः ॥92॥

गद्यम् - एवं रमणीयरमणीयं हुतहविराज्यादिहव्यपटत्पटद्वद्धि-सुखोत्थितबहुसुगन्धिलसवनधूमसंछन्नाभ्रपथे मधुरमधुरश्रौतस्मार्तधर्मनिर्णय-प्रसक्तविविधविबुधवचोविधावधारणागतनागरिकजनवितानदुर्दमसम्मर्द-निरन्तरसविधे मखावसधे यथाविधि तदध्वरक्रियायां प्रचलन्त्यां तत्र यज्ञवाट्यां शाटीनिबद्ध कटीतटीकैरुटजवाटेष्वितस्ततः पर्यटद्वटुविपरैरास्तीर्णासु साग्रदीर्घ सप्तपर्णी पर्णपंक्तिकासु सूपापूपमधुरमधुरसधुरन्धरातिरसलड्डुकादिभक्ष्य-लक्षितासु मरिच सर्षपभरितपरीमलघुमघुमत्पनसमुखसकलशलाटुशाकानीक-

नासारञ्जक व्यञ्जन प्रशस्तवस्तुनिस्तुलासु द्राक्षाफलैलाशर्कराखण्डकर्पूरपूरित-पायसादि चोष्यद्रव्य भव्यासु पनसफलगर्भखण्डविसरानुसरत्परीमलगुम्भित-रम्भारसाल रसालंकृत फलावलीललितासु नयनानन्दचित्रवर्णचित्रान्नपूर्णासु, आज्याभिधारी कृतपुराणशालितन्डुलान्नमन्डलासु, दधिविधीतधवलदीधिति-मालिकास्वलं कृतासु सतीषूपपत्रं पंक्तीकृतजनभोजनमध्यजेगीयमानहृद्य-पद्यात्मकगोविन्दस्तुतिनन्दितभोक्तृलोकैककण्ठ्योद्घुष्यमाणनमोनमश्शब्दै-स्तोषमभिलाषमातन्वन्नक्तंन्दिवमेवं सवनवनमुल्लसितरसावनमासीत् । ततश्च - ॥93॥

श्रीशातकर्णिरुचितैस्सवने विर्तीर्णे-
स्सद्वर्णभागुभयतोमुखगोसुवर्णैः ।
अश्वादिभिश्च विजितार्णवदानपूर्णः
पूर्णाहुतिं स निदधे मुदिताग्रवर्णः ॥94॥

गद्यम् - अपि च स वदान्यश्शालिधान्यराशींस्तद्वाहनपाटवान् बलवर्धित बलीवर्दबद्धशकटकोटीरस्वर्णाञ्चललाञ्छनाञ्चद्रोचिराडम्बराणि चीनाम्बराणि च पारशीकतुङ्गतुरङ्गोद्यमानशताङ्गं च यथोक्तं सत्पात्राणां धरित्रीसुगणां पात्रीचकार। अपि च - ॥95॥

सीतासदङ्घ्रिसरसीरुहसंस्कृतेन स्वीयाञ्जलिस्थितिपवित्रतरेण राज्ञी ।
गोदाजलेन च पवित्रतमेन मन्त्रैर्यज्ञावधाववभृधं व्यतनिष्ट राज्ञा ॥96॥

(श्रीगोतमोन्नततफालासरभूतेस्वीयाञ्जलिस्तितिपवित्रतरैश्चराही।
गोदाजलैरपि च पूततमैस्सुमन्त्रैर्यज्ञावधाववृधं व्यतनिष्ट राज्ञा॥)

एवं स राट्परिसमाप्तमखान्तदीक्ष-
स्सर्वक्षमासुरवितीर्णसुदक्षिणौघः ।

 In Public domain. Digitization Muthulakshmi Research Academy

अन्नाऽभितर्पितबुभुक्षुजनाभिलक्ष्यः
श्रेयोऽतनिष्ट निजराज्यपदेऽतिदक्षः ॥97॥

यज्ञेन प्रमुदितमानसो महेन्द्रस्सस्यानामनुगुणवर्षमभ्यवर्षत् ।
लोकानां महिरपि वाञ्छिवार्थदासीद्दोग्ध्रीव त्रिदिवभवां तदीयराज्ये ॥98॥

गद्यम् - एवं धर्मधेनुस्तत्र पादचतुष्टयं निक्षिप्य यथेष्टव्यवहारं विहरति स्म । ततस्त्रिलिङ्गविभुश्शातकर्णिरनतिकाल एव - ॥99॥

पितुराचरितं सदानुकार्यं हयमेधं कृतवानयं द्विकृत्वः ।
नयमञ्चितधर्मशास्त्रदीव्यन्नयनोयं प्रणिनाय भूजनानाम् ॥100॥

वेदमातुर्महागर्भे स्थितान् गूढान् महाफलान् ।
विदुषामपि दुर्वेद्यान् प्रचारासंस्थितान् घनान् ॥101॥

"शतातिरात्रा" "ऽऽत्तोर्याम" "गवामयन" नामकान् ।
चकाराऽन्वारम्भणीयमुखान् बहुमखान्स राट् ॥102॥

गद्यम् - एवं सम्पादिततेजोगुणयशस्सुरभिसुरभीकृतदिगन्तवलभीकश्शत्रु भीकरस्सुजनमनोऽमृतशीकरस्स धरावरः प्रवरस्सर्वराजन्यानां प्रवरः परस्त्रीणां वंशकरश्शातवाहनानां भूत्वा दशशरत्परिमितं प्रजानुरञ्जनेन प्राज्यं राज्यमकार्षीत् ॥103॥

कुन्दबृन्दरदनालिसुन्दरा मन्दमन्दमृदुमन्दगामिनी ।
कामपूर्वपदभास्वरेश्वरी सा तु पातु कुलदेवताऽद्य नः ॥104॥

इति श्रीमदुभयभाषासनाथद्विभाषि सोमनाथकृतौ
राजरत्नमालायां द्वितीयं रत्नम् ।

****

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयं रत्नम्

श्री कामेश्वर्यै नमः ।

द्विभाषि सोमनाथकृता श्री राजरत्नमालाचम्पूः

सगणाधिपमासने स्थितायां त्वयि पाणिं नयति स्थिते कुमारे ।
उपमृज्य शिरः प्रासारितां तां क्षिप कामेश्वरि मय्यपि त्वदीक्षाम् ॥1॥

गद्यम् - अथैवं मधुमथनवदधिगतविधिहितभुवनजनावने, भुवमभिनवविभव धनकनकवसुमसृणमसदृशं कुशलमुपनयन्निखिलनृपविपुलतरशिरस्सरसुरभि-सुरभिलदलविलसदरुणमृदुपदकमलकिरणरुचिनिचितनखरशिखनिकरे सिमुककुलशेखरे विलसति सति, ॥2॥

आन्ध्रेशे स्फुरति ततश्च शातकर्णा-
वान्ध्रत्वे दिशिदिशि पुष्पिते यशोभिः ।
आन्ध्राणां मृदुमधुरैक मञ्जुवाणी-
मञ्जीरध्वनिभिरुदञ्चिते दिगन्ते ॥3॥

दृष्टो नूतनगर्भचिह्ननिवहो देव्यास्तदानीं क्रमात्,
राज्ञो भाग्यवशात्तया सममभूत्कीर्तिश्च सीमन्तिता ।
राज्यश्रीर्विहितार्थदोहदवती राजत्फलैर्गर्भिणी,
नानारामयुतान्ध्रदेशसुषमासम्पत्प्रसूतिर्मही ॥4॥

गद्यम् - तथा च शुभेऽहनि महाराजस्य पट्टमहिषीशिरोमणौ नागानीकायाम् ॥5॥

नागानीक महेन्द्र सान्द्रधिषणो नागारिसत्त्वाञ्चितो
नाकौ कोऽशजनिर्जनेडितकलानानाविलासार्णवः ।

 In Public domain. Digitization Muthulakshmi Research Academy

"पूर्णोत्सङ्ग" इतीरितश्शुभयुतः पुत्रः प्रभूतो यतः
पूर्णोत्सङ्गरमामवाप नृपतिः पुण्यादगण्यादिह ॥6॥

गम्भीराशयभासिनो नरपतेर्दीव्यद्गुणाम्भोनिधे-
र्जातानूनमहोदयस्य सुकलावर्धिष्णु तेजोंऽकुरः ।
दृश्यश्रीर्न मनोचितो गुणभृतां सर्वप्रजानां जनु-
र्मात्राद्राजकुमार एवमुदितस्संवर्धमानोऽभवत् ॥7॥

गर्भाष्टमेऽब्द अवनीपतिनोपनीत-
स्सोऽभूत्त्रयीस्मृतिचयं गुरुणोपनीतः ।
तस्याभिजात्यगुणशीललसद्विनीते-
र्लब्धं यशोऽपि सुधियां श्रुतिषु प्रणीतः ॥8॥

युक्तोऽपि नव्यवयसा परयौवतेऽसा-
वस्वप्न आस, न तु केवलमोजसापि ।
कौटिल्यमात्मनि विहाय निजप्रवृत्तौ
कौटिल्यमेव विधिमैच्छदधीतनीतौ॥9॥

सत्कीर्तिरस्य हरिदन्त करीन्द्रदन्ते-
ष्वालिख्य तद्गुणकनच्छुचिवर्णपंक्तिम् ।
राजन्यकीर्तिकमलाशिरसि स्वयं सा
सीमन्तमौक्तिकमभून्महिताक्षरश्रि ॥10॥

गद्यम् - इत्थं वर्धमाने कुमारहिमांशौ जनकश्रीसातकर्णीराज्यपालने दक्षं तं वीक्ष्य दशवर्षसम्मितस्य स्वराज्यपालनस्य धुरां तत्करे निधाय पितृपितामहानु गतं वानप्रस्थं व्रतमन्ववर्तत । ततः पूर्णोत्सङ्गसात वाहमहीपतिः ॥11॥

पितुस्समासादितराज्यवैभवो भुवि श्रियं स प्रणिनाय नूतनाम् ।
रवेरुपेत्य प्रतिबिम्बमालये रुचिं विचित्रामिव रत्नदर्पणः ॥12॥

निरासिताऽऽसीन्नीयमापवर्जिता स्वपालितोर्व्यामसतीव दुःष्कृतिः ।
समस्त वर्णोचितधर्मरक्षणे नियुज्य तस्मिन् दृढबद्धकङ्कणे ॥13॥

पितृप्रवृत्तेऽध्वनि पालनक्रमे चरन् प्रजौघं च तथैव चारयन् ।
यशोदशामम्बरसीम्नि कल्पयन्शशास सोऽष्टादशवत्सरा भुवम् ॥14॥

अजायताऽस्य प्रतिमावदात्मनः पितामहस्य प्रतिमानविक्रमः ।
कुमारचन्द्रस्स तु **शातकर्णि**रित्युदीरितो धीप्रतिमत्पितामहः ॥15॥

उदिते कुसुमे तदीयगन्धस्फुरति खलु प्रभवाच्च मुग्धमुग्धः ।
इति तद्गुणसौरभं जनौघः प्रसृतं वर्णयति स्म शैशवाच्च ॥16॥

सिंहस्य सिंह एव प्रभविष्यति खलु शिशु, रसालस्य ।
कथमाम्रफलमुदेतीत्यूचुः पितरं प्रभुं सुतं वीक्ष्य ॥17॥

गद्यम् - अपि च - ॥18॥

यावद्रूपं गुणस्तावान् यावती धीर्णयस्तथा ।
तस्यास किन्तु सर्वेभ्यस्तेभ्य ऊनमभूद्वयः ॥19॥

गद्यम् - ततोऽभ्यस्यमाननानावेदवेदाङ्गकलाकलापे कुमारशातकर्णौ, ॥20॥

कवीन्द्रा गाधासु स्वजनकमहास्थनसरणौ
गुणानाचक्षाणा पितुरमलिनान् तैरपि समम् ।
गुणैर्लब्धं स्वीयैरपजयमवाच्येषु ललितं
रसोदञ्चद्वाग्भिर्मृदु विशदयन्ति स्म समुखम् ॥21॥

गद्यम् - अपि च क्रमेण सर्वमङ्गलाङ्गम्फुरन्मूर्तेस्सहजामोघमहाशक्ते राजशेखर सूनोस्तस्य कुमारस्य सुचरितकथामधुरश्लोकवैभवः पत्रान्तरचित्रवर्णोपशोभिनीं कान्तकान्तिनिचितालङ्कारप्रायसुन्दरगुणकलापां, दूरीकृतरन्ध्रान्वेषिभुजङ्ग सङ्घातां, शुचीभूतानामासङ्गयोग्यां, महोदारधाराधरविशिष्टपदक्रमाभिरामां, मृदु विदितरासश्रीपूरितसाधुमधुरोत्कण्ठां, मयूरोपलक्षितामिव रमणीयां श्रियं प्रणयति स्म ॥22॥

विवर्धमानो द्विजराजनन्दनस्स तु क्रमावाप्तधनुष्कलाचणः।
धनुर्विदो द्रोणसमस्य तत्पितुस्स दृग्बलो द्रौणिरिव व्यराजत ॥23॥

धराधरणपारीणं धराधरसमं धृतौ।
स राजेन्द्रस्सुतं वीक्ष्य करोति स्म भुवः पतिम् ॥24॥

समयेन नियुज्य बालभानुः प्रथमाद्राविव राज्यभद्रपीठे।
जनकेन नियुज्य सातकर्णिस्स बभौ सन्नयनाब्जरञ्जकौजः ॥25॥

स समागत एव पालनस्य स्वधरित्रीमवलोक्य सिंहदृष्ट्या ।
स्वपितामहराज्यकालबद्धद्विषमुन्मूलयितुं कलिङ्गवंशम् ॥26॥

निश्चित्य भावे निरवद्यभावे मिथस्समानाय्य महाप्रधानम् ।
कलिङ्गधात्रीतलजैत्रयात्रामुत्त्वा स तं चानुमतं विजानन् ॥27॥

तेनैव सम्राण्णिजदण्डयात्रां चमूपतीनां प्रकटीचकार ।
कलिङ्गराजस्य रणे प्रणेतुं शरासने स्वभृकुटेर्विकारम् ॥28॥

अथ शुभसमये चमूसमेतश्चलदलकां तटलाङ्गलिच्छलेन ।
खगरवशुभवादिनीं स दृष्ट्वा कुलजननीं विभुरक्षपादकन्याम् ॥29॥

अभिवन्द्य तरङ्गिणीमणिं बहुसम्पूज्य च पूर्वदिङ्मुखः ।
क्रमशः पुरमाप पीठिकां वसतिं माधवकुक्कुटेशयोः ॥30॥

स निमज्ज्य सरोवरे गयाङ्घ्रेर्हरमाराध्य कुमारमातरं च ।
पुरपण्डितमण्डलीं धनाद्यैर्बहुसत्कृत्य समस्तशास्त्रशौण्डाम् ॥31॥

अयमान्ध्रपतीरयात्ततं प्रययौ सान्द्रवलावली युतः ।
नगरीकुमुदाक्षिवीक्षणैः पथिनीराजितवक्त्रचन्द्रमाः ॥32॥

घनगर्वमगस्त्य निर्गतं शबरीणामुदयत्कुचानिव ।
श्रितमीक्ष्य मुखं न्यवर्तयत्पथि विन्ध्यस्य गतत्रपो रसाम् ॥33॥

वनवांशिकबीजमण्डलं मधु पक्वं शबरैरुपाहृतम् ।
बुभुजे पचनेन पिच्छिलं नवपीयूषरसं च धैनवम् ॥34॥

विविधैः खगबृन्दकूजितैरतिचित्रैर्मृगमण्डलैरपि ।
महिमाढ्य महौषधिव्रजैस्स घनेऽमोदत विन्ध्यकानने ॥35॥

उपबृंहितदन्ति बृंहितैस्सुरभिग्रासभवैः प्रतिध्वनत् ।
हयधावनधूलिधूसरं वनमुत्क्रम्य दलैः पुरोऽगमत् ॥36॥

सबलस्स ततः पुरोऽवनौ दृतमैक्षिष्ट कलिङ्गपट्टणम् ।
पुरपङ्कजलोचनालकैः परिखेलच्चलसागरानिलम् ॥37॥

स निविश्य बलेन मल्लिकावनिकां तत्पनमानमानितः ।
पटहेन कलिङ्गभूपतेस्समरावाहनमाश्ववेदयत् ॥38॥

सातकर्णिसमरागमवार्ताजातकर्णपरुषध्वनिजातिः ।
जातवेदस इवोज्ज्वलमूर्तिर्जात उद्धतकलिङ्गनरेन्द्रः ॥39॥

 In Public domain. Digitization Muthulakshmi Research Academy

दृततरमधिरुह्य गोपुराग्रं रिपुदलमैक्षत तत्पुरीपुरस्तात् ।
स विपुलमपराम्बुधिर्दिदृक्षुः प्रथमपयोधिमिवागतः स्थितं तत् ॥40॥

गद्यम् - अथ त्रिलिङ्गराजसेनामुखस्याभिमुखं कलिङ्गराजस्स्वसैन्यं चतुरङ्ग राजितं प्रेरयित्वा स्वयमपि धनुष्पाणिः पश्चाद्रयाभरणहयोह्यमानं स्थमधिरुह्य निजयोधजनविनिर्मुक्तशरविमरचक्रीकृतधनूराजिमुद्रिक्त बलबृंहित-ह्येषाविशेषभूषितमहागजवाजिं, चटुलभटदलकरनटद्धलद्धलदसिदलदितरेतर-वपुस्स्रवदस्त्रधाराप्रवाहपरिभ्राजिघोराजिमकल्पयत्। त्रिलिङ्गराजसेनाऽपि गजवरैर्मदोद्वेलसंग्रामवृत्तिनिर्वृत्तिराश्विकदलैरवार्यशौर्यतेजोरोचीरेचितताशताङ्ग सङ्घातैश्शात्रवचक्रचन्द्रमण्डलस्य केतुविशिष्टस्वरूपाभूत्वापुनस्साभटस्फुटित-वैरिवक्ष कवाटकोटिरान्ध्रस्कन्धावारवाटी नटन्ती मृत्युदेवतेवापहृतसकलकलिङ्ग वरूधिनीप्राणपञ्चका तत्पञ्चके बभूव ॥41॥ ततश्च - - -

असर्सरीगोपुरवप्रमण्डलेष्ववीविशद्राजसभाग्रमण्टपम् ।
अचूचुरत्कोशधनं समुज्ज्वलं बलं त्रिलिङ्गस्य कलिङ्गपट्टणे ॥42॥

अनवनानि वनान्यकरोद्धटान्नृपनिकेतनकेतनमाक्षिपत् ।
निरवरोधवरोधगृहाङ्गणान्यवरुरोध महान्ध्रवरूधिनी ॥43॥

कालिङ्गस्य बलासूनां रिङ्गणे समराङ्गणे ।
सबन्धुर्बन्धुरोऽस्त्राणां गुणैर्युध्याहतस्ततः ॥44॥

गद्यम् - नयाभरणस्सातकर्णिधराभरणो विहायान्तःपुरस्त्रियः पुरं तां करगता मकुरुत। ततश्च - - ॥45॥

विशारदस्सङ्गरसङ्गखेलने विशांवरोऽध्रः परिगृह्य तत्पुरीम् ।
सशारदावारिधिसङ्गमस्थले विशालसेनाविसरन्यवेशयत् ॥46॥

समुद्रतीरे समधूककानने शरन्निशाभासुरसान्द्रचन्द्रिके।
अनीनटंस्तत्समराङ्कनाटकं निषेव्य तद्वृक्षमधुद्रवं भटाः ॥47॥

श्रीसातक्षितिपतिमण्डनः कलिङ्गं
भूभागं करगतमावहन्नशेषम् ।
स्वायत्तक्षितिपरिरक्षणाय दक्षं
निर्दिश्य स्वसचिवमुख्यमाप्तमेकम् ॥48॥

पुरमुदितरमां न्यवर्तत स्वां रथगजवाजिभटव्रजैस्समेतः ।
धवलविजयकेतुरोचिषाऽभ्रे शशिरुचिघृष्टिगणं स सन्दधानः ॥49॥

गद्यम् - एवं पूर्वसागरात्प्रस्थाय स्वपूर्वनगरं प्राप्य सुमुखी भवन्निजभूजने तस्मिन् राजनि यशोजनितसान्द्रधवलिमगुणव्रीडितकल्पभूज-निवहे सुखेन स्थितवति ॥50॥

मगधाख्यमागधीवनपाटलकुञ्जाभपाटलीपुत्रे ।
पाटलसमसुमगन्धिनि जौद्रकनामा तदाऽऽस शुङ्गनृपः ॥51॥

गद्यम् - तस्या नगर्या अतिमात्रलक्ष्मीविलाससुषमापरिमलेनाक्रष्ट-हृच्चञ्चरीको दुर्मदातिरेकश्शकनामद्वीपान्तरागतराजलोकः सक्रौर्यशौर्यदुरालोक-स्सन्नेकऽस्मिन् दिवस आकस्मिकमनीकिनीभिरागत्य पुष्पपुरमवरुरोध; जौद्रकोप्यक्षुद्रवीर्यमुद्राभद्रं स्वसैन्यसमुद्रं त्वरिततरं प्रेरयामास।

एवमगाधमागधसेनासागरे समुच्चलत्यपि पराक्रमश्शक्रचक्रस्य वीररसभवेन तेजोज्वालावलीरोचिराडम्बरेण बाडव इव धनुःप्रचण्ड पाण्डितीशौण्डमहावीरप्रेरितो रामबाण इव गर्भीकृतमहारथिककोपप्रकोप ज्वलज्ज्वलननिस्तलोऽगस्त्योदर इव भूत्वा क्रमेण तं शुष्कीकुर्वन्, प्रतिष्टम्भयन् स्वस्मिन् प्रलीनयांचक्रे; तदानीं तु ॥52॥

 In Public domain. Digitization Muthulakshmi Research Academy

रौद्रकल्पितरुषातिरूषिते जौद्र केऽथ मगधावनीपतौ ।
गुप्तमूलबलमानयन् रणे दीप्तिमानिव विभाय युध्यति ॥53॥

एतस्मिन्नन्तरे सम्राट् शातकर्णिस्त्रिलिङ्गपः ।
विदित्वा लुप्तसंरक्षां मागधीं विदिशापुरीम् ॥54॥

उन्नमितमणिफणाग्रं वलयीकृतदेहमुरगमिव तार्क्ष्यः।
मणिगोपुरवरणयुतं पादबलेनैव तन्नगरमादात् ॥55॥

अरिन्दमोऽन्ध्रभूस्वर्गधुरन्धरभुजायुगः ।
पुरं दुरापां जित्वा तां पुरन्दर इवास्फुरत् ॥56॥

तत्र पुष्पपुरसङ्गरसङ्गे जौद्रकं शकगणो विनिहत्य ।
अक्रऽमेध्वनि कृतक्रमचेता आक्रमन्नृपतिपीठमनीशम् ॥57॥

शकामागधमक्रम्याप्यान्ध्रेशे विदिशा ग्रहात् ।
अक्ष्यैकं तु विनिक्षिप्य स्थितास्तद्बलशङ्किताः ॥58॥

मौढ्ये गुरुणा तुल्यं काठिन्यगुणे समं महामेरोः ।
शेषाहिः कौटिल्ये शकपालनमास तद्विना सुगुणान् ॥59॥

गद्यम् - एवं तत्र मगधदेशे दशवर्षपरिमितं शकराजपरम्परापालने प्रचालिते अत्यर्थमर्थलुब्धमुग्धमना अन्तिमनायकश्शकानामेकः कलिङ्गराज-धानीखण्डं शातभूजानिरक्षितं हर्यक्षमुखगतमामिषखण्डमतिमात्रबुभुक्षितः पुण्डरीक इवापक्रष्टुमभीक्ष्णमभीष्टीबभूव ॥60॥

एवं मत्वा सेनां नीत्वा स्वेन प्रदीप्तशरशरधिः ।
शरधिरिव सोल्बणस्सन् कलिङ्गदेशं ययौ स भङ्गयितुम् ॥61॥

बहुवाहिनीसमेते पयोनिधिरिवागते शकाधिपतौ ।
बलरसितश्शातविभुस्तनयित्नुरिवास संस्फुरंस्तत्र ॥62॥

कुम्भाकुम्भिरदारदिस्फुटरटस्क्रोधात्कटुप्रोद्भटं
तुण्डातण्डिकटाकटिप्रकटभीभीभत्सरौद्रोत्कटम् ।
स्फारं घोरमपारसङ्गमभृत्तत्रोभयोर्दन्तिनां
नानाकारगजासुरेभमुखयोस्संकृद्धयोर्युध्यतोः ॥63॥

उक्षिप्तदीतखड्गः पुरोऽरिशिर सैव सममवातरत् ।
अवतीर्ण शिरोऽप्यपतत्पुरस्थवपुषैव तद्रिपोर्युगपत् ॥64॥

बहुतुरङ्गतरङ्गकरम्बितं मदकरीण्मकरप्रकराकुलम् ।
रुधिरवारियुतं रथनौशत रणमशोभत सान्द्रमखातवत् ॥65॥

प्रतिकूलशिलातिकर्कशीभवदाघातनिरस्तविस्तृति ।
शकराड्बलमस्त्रलोहितद्युति पश्चान्मुखमास शोणवत् ॥66॥

स निरीक्ष्य बलं तिरोहितं शकनाथो रुधिरातिरोहितम् ।
धृतिरोपितधीरवाक्शतैरतिरोचिस्मधनुर्न्यवर्तयत् ॥67॥

समरार्जुनसत्प्रथार्जुनधुतिलीलार्जनविक्रमार्जवः ।
द्विषतं युधि सातकर्णिरप्यथ कर्णायितमाप चापधृत् ॥68॥

सुवर्णमयकार्मुकः प्रचुरकाण्डवर्षी मुहुः
प्रकृष्टगुणघोषणः प्रबलशक्तिवज्रायुतः ।
शकान्वयमहीभृतः पृथुलश्रृङ्गभङ्गीकृतौ
प्रवृत्य विपुलान्ध्रसद्भुवनभृद्वरेण्यो बभौ ॥69॥

 In Public domain. Digitization Muthulakshmi Research Academy

द्वीपिव्याघ्रौ दृप्तौ प्रहरन्ताविव तरक्षुहर्यक्षौ ।
कलभद्विरदाविव युधि बभतुरशाकशातभूतलाध्यक्षौ ॥70॥

युध्यमानौ समानौ तौ समानौ प्रायशो बले ।
अवलेपबलाकृष्टौ शकशातौ विराजितौ ॥71॥

गद्यम् - ततश्शातकर्णिस्तु प्रवर्धितबलोदीर्णः उदीर्णविक्रमजृम्भितस्स क्रमश श्शतराडपि विशीर्णसत्त्वो भूत्वा रणे तौ भीमसूताविव ददृशाते । ततः, ॥72॥

त्यक्तलज्जं शकं शातचक्रे भीतिप्रधाविनम् ।
मुक्तकञ्चुककालाहिं बर्हीवातिरुषान्वितः ॥73॥

सैन्यैस्स हैन्यैर्धावन्तं शकं तं दैन्यमास्थितम् ।
पाटलीपुत्रपर्यन्तं शातराडन्वगाद्बलैः ॥74॥

अनुधाव्य च शातकर्णिना स्वपुगत्स्वर्गपुरीं स यापितः ।
स्वमतेरसमीक्ष्यकारिता फलमीदृग्विधमन्वभूत्ततः ॥75॥

विदलीकृतमाकुलं शकैर्विरसं पुष्पपुरं गतोऽन्ध्रराट् ।
पृथुविक्रमदोहदश्रिया पुनरुन्मेषवदा ततान सः ॥76॥

स तदा विपुलाधवैजयन्तीमकरोत्पुष्पपुराम्बरे जयन्तीम् ।
घनशातयशो विशिष्टरूपां सुरकुल्यामपि रोचिषा हसन्तीम् ॥77॥

अथ समधिगतश्शकाधिपत्यं प्रकटपराक्रमविक्रमार्ककल्पः ।
कविकुलगुरुवर्धनोऽन्ध्रसम्राडविकलगौरवमाप, दानकल्पः ॥78॥

वदनेन सरस्वतीवताजयलक्ष्मीस्थितिना च वक्षसा ।
चिरवैरतया तया तया कृतमाध्यस्थ्य इवाऽऽस वाञ्छितः ॥79॥

वशीकृत्य वशी लक्ष्मी चक्रवर्ती स मागधीम् ।
निस्सपत्नां सपत्नीं तामान्ध्रभूमेरपालयत् ॥80॥

एवं षडुत्तरगतं प्रशशास राज्यं
पञ्चाशदब्दसमयं स महामहीन्द्रः ।
लोकत्रयीमपि महेन्द्र इवायमान्ध्रीं
क्ष्मां मागधीं च समवाप्य कलिङ्गधात्रीम् ॥81॥

एतादृशाऽऽस विभवेन विराजमानोऽनेतीदृशो बलहृताखिलराजमानः ।
नेता त्रिलिङ्गनियतेः फलभाग्यनेता सन्तानसप्तकतया कुलसद्वनस्य॥82॥

तस्याजनि रजनी करनवनलिनशरोपमानमधुमूर्तिः।
लम्बोदर इति नाम्ना शुम्भद्दरहासभासिवदनश्रीः ॥83॥

गद्यम् - कुलनन्दनस्य हरिचन्दन इवाऽयं राजनन्दनो नयनानन्दक्रमादनस्सन् वर्धमानः॥84॥

शुचिरास्तनपानतक्रमादुपनीतो गुरुणा पुनर्गुरोः ।
वपुषा च धियाप्यभूच्छुचिस्स विगाह्याक्षपदीं सरस्वतीम् ॥85॥

बहुगूढपदाद्बहिश्शरीरादतिगूढाशयतोऽन्तरङ्गदेहात् ।
अविशद्विदितस्य शेषमूर्तेरनिगूढैकपदं च वाक्प्रपञ्चम्॥86॥

गद्यम् - क्रमेणान्वीक्षक्यादि नीतिलक्षणानुवीक्षकं तं वीक्ष्य, विचक्षणमिव राज्यरक्षणे जनकश्शातकर्णिरशेषराज्यरमां सूनोरनुरूप-गुणानन्यया कन्यया सहोद्वाहयाञ्चकार ॥87॥

अथ वहन् स बलेन सहस्रशः क्षितिधुरां विदुषां च कृताकरः ।
वररमारमणीमणिकेलिभूस्सितयशोभिरशोभत शेषवत् ॥88॥

 In Public domain. Digitization Muthulakshmi Research Academy

एवमष्टादशाब्दं स राज्यं प्राज्यमथाकरोत् ।
मागधीभागधैयैस्स्वामान्ध्रामामोदयन् बहु॥ 89॥

तस्य राज्ञो व्यराजेतां राज्ञी राजन्वती च भूः।
पुत्त्रैरपि सदा सस्यैः फलिते गर्भसम्पदा ॥90॥

आपीलकाख्यतनयस्सनयोऽथ राज्ञः
प्राज्ञोऽग्रिमश्च जनुषापि धिया सुतेषु ।
सत्त्वश्रियं समधिगम्य तदाज्ञयाऽऽसी-
दन्ध्रक्षमाकमलिनीनवराजहंसः ॥91॥

द्वादशाब्दां धरामान्ध्रीं स चान्द्रीशुचिमद्यशाः।
शास्त्रेणैव वशीकृत्य बुधांश्चारानपालयत् ॥92॥

स्वातौ मेघादिव स्वच्छं शुक्तिगर्भे सुमौक्तिकम् ।
मेघस्वातिर्नृपाज्जातो देव्यां धीवरमोदकृत् ॥93॥

अथ तत्पितुरागतामसौ महिमष्टादशहायनान्यशात् ।
तदनन्तरमस्य सन्ततिर्नृपतिस्स्वातिरितीरितोऽभवत् ॥94॥

गद्यम् – ततस्स्वातिर्मेघस्वातेस्सूनुरनूननूतनयशस्सूनसुरभिलदिगन्ताराम-रमणीयसीमा, कमनीयमुखविलाससरस्सरोरुहायितनयनाञ्चालाञ्चितश्रीवधू-मधुरलाच्छनः प्रपञ्चितनिखिलनिगमागमनयधर्मप्रपञ्चस्य प्रजानीकस्य जनयितेवाष्टा दशवर्षपरिमितं क्षितिमभौक्षीत् ॥95॥

स्कन्दो महेश्वरस्येव स्वातेस्तस्य महेशितुः ।
पीवरोरुभुजस्कन्दस्स्कन्दस्वातिरजायत ॥96॥

In Public domain. Digitization Muthulakshmi Research Academy

सत्कीर्त्या विहरन्नुपेत्य स महीं पाटीरवाटीतटे
सागन्ध्यं सुरपुष्पवाटिमरुता कुर्वन् गुणैर्गन्धिलैः ।
शीतस्वान्तदयारसात्तयशसाप्यब्धित्रयं संविशन्
स्कन्दस्वातिरभूतपूर्वमभुनग्भूमीं शरत्सप्तकम् ॥97॥

गद्यम् - ततस्तस्य **मृगेन्द्रस्वातिनामा** कुमारकण्टीरव उद्बभूव । सोपि च ॥98॥

शैशवे कृष्णसंकाशः बाल्ये श्रीरामसन्निभः ।
यौवने कल्किकल्पस्सन् प्रजामोदमपद्यत ॥99॥

प्राचीनमार्गमविहाय गुणाञ्चितश्री-
रान्ध्रीं प्रपद्य मृदुरीतिविशिष्टभावः ।
ऊर्जस्वलैकवचनः कमनीयवृत्तः
एवं शरत्त्रयमशादुदयोन्मुखस्सन् ॥100॥

शत्रुञ्जया मणिमनोहरमौलिकान्तिशर्वानुषङ्गधृतदेवसरस्वतीका ।
आराध्यतेऽद्य तरसा मनसा च वाचा कामेश्वरीश्वरि मया तव कुन्तलश्रीः 101॥

इति श्रीमदुभयभाषासनाथ द्विभाषि सोमनाथकृतौ
राजरत्नमालायां तृतीयं रत्नम् ।

****

 In Public domain. Digitization Muthulakshmi Research Academy

चतुर्थं रत्नम्

श्री कामेश्वर्यै नमः ।

द्विभाषि सोमनाथकृता श्री राजरत्नमालाचम्पूः

अम्ब ! त्वदीयकृपया रचयामि नूत्नं प्रत्नं मणित्रयमतीत्य तुरीयरत्नम् ।
तापत्रयं सुखतरं प्रविलङ्घ्य शौरेः प्रेम्णेव भक्त उपयाति तुरीयमर्थम् ॥1॥

अथ मृगेन्द्र महान्ध्रमहीपतेरजनि कुन्तलनामसुताग्रणीः।
बलसमुज्ज्वलशौर्य महौजसा मृगपतेरिव तत्समशाबकः ॥2॥

क्रमेण कृतसंस्कारः कर्मणा कार्मुकेन च ।
नैजं द्विजत्वमकरोद्गुणवत्तरमेष सः ॥3॥

बाल्यात्सुधामधुरकाव्यरसावगाहस्सोतिप्रमुग्धकवितारचितोपगूहः।
वाणीमनेकरसबन्धुरपद्यपुष्पैर्हृद्यैर्मृदीक्तिदलितैस्सुरभीचकार ॥4॥

अप्राकृतः प्राकृतषट्करूपां स्वमातृभाषावनिकां निविष्टः ।
तज्जं स्वमान्ध्रं बहुपुष्पजन्यमास्वादतालीव मधुद्रवं सः ॥5॥

स बभौ सर्वभाषाणां सम्पदा संस्कृतं विना ।
श्रियेव सर्वपुष्पाणां वसन्तो मालतीं विना ॥6॥

गद्यम् - अथ क्रमेण मधुमधुराङ्कुरप्रवालकोमलायां तस्य प्रथमदशायां प्रस्थितायाम्, ॥7॥

वीतबाल्यपदे सद्यः पदं निक्षिप्य यौवनम् ।
व्यलासयदमुं राधचैत्रान्त इव पाटलम् ॥8॥

In Public domain. Digitization Muthulakshmi Research Academy

तमभिनववसन्तं वीक्ष्य चित्रान्तरम्यं
पुलकिततनुवल्यो जातरागाङ्कुरौघाः।
निखिलनृपतिकन्याः पुष्पितामोदवत्यो
रसमयहृदयै स्स्वैरासुराराधयन्त्यः ॥9॥

कुमार एवं सुकुमारधीभरोऽव्यकल्पयच्छ्रीमविकल्पितां पितुः ।
यशोभिराशाचयशोभिसद्गुणः पराक्रमेणाऽपि नमत्पराक्रमः ॥10॥

गद्यम् - एवं वर्धमानः प्रत्यर्थिमानहारी पितुस्सामर्थ्यं स्वयमपि समर्थयन् मान नीयगुण नितान्तःकुन्तलस्वातिकर्णिर्व्यभासत। ततः कतिपयवर्षेषु गतेषु, ॥11॥

गुणोत्तरामुत्तरदेशशासितुस्तनूभवां सञ्जनयन्मनोभवाम् ।
स्वयंवरे सत्समितौ प्रियां वरां वधूमधीनां स समाददौ मुदा ॥12॥

गद्यम् - सा नववधूरपि जनकेन कुन्तलस्वातिकर्णिकरान्तरे निक्षिप्ता आन्ध्रोपराजधानीं प्रधाननगरीकल्पां महाराष्ट्रप्रतिष्ठाननगरीं प्रेषिता, तत्र भर्त्रा सह वसन्ती वसन्तदत्तमदनकरवासन्ती केलिकन्दुक इव लसन्ती वयोविलास विशेषेण नभोमासविकसिता चूतानुषङ्गिणी मालतीवामोदवती भास्वन्ती मृदु मधुरमनोहरश्रृङ्गारवीचिकासेचिता राजहंसीव मनोवल्लभमनः कासारमुप विशन्ती प्रशान्तपावना गृहिणी मणीगणानांवतंसीभूता परमशोभत ॥13॥

विनूत्नरम्भारसगुम्भितान्तरा सिताम्रमाला नयनानुरञ्जिनी ।
स्मरोपनद्धा मणिमेखला रतेर्गभीरश्रृङ्गारतरङ्गिणी च सा ॥14॥

अभूदपि स्निग्धसुरोक्तिसाहितीसरस्वती भर्तृगृहे क्रमं क्रमम् ।
बभूव सा प्राकृतदेशिवाहिनी विलुप्तगीर्वाणझरी सरस्वती ॥15॥

 In Public domain. Digitization Muthulakshmi Research Academy

स्वनायकप्राकृतदेशिभाषणे रतिं दधौ योजयितुं स्वसंस्कृतम् ।
सजातिपत्रीफलवीटिसेवने हितेव काश्मीरभवं प्रगुम्भितुम् ॥16॥

पितुरागतमावहंस्ततः कुतलं कुन्तलराजतल्लजः ।
चरितैस्सुमनोमनोहरैस्सुरभिस्सन् व्यलसद्वतंसितैः ॥17॥

स्वराज्यलक्ष्मीं स्मरराज्यलक्ष्मीं वधूं करेणैव समञ्चितेन ।
सदानुपाल्योप्युपलाल्य रेजे सीमान्तसीमन्तपदे तयोस्सः ॥18॥

अथ कदाचिदितः प्रियया वने निजवधूवचनैः कृतसंस्कृतम् ।
शुकमचुम्बत तत्तरुणीवचांस्यनुगमिष्यदिवात्ममनोरथम् ॥19॥

स मुमुदे प्रियया सह तत्पदादुचितसंस्करणां प्रकृतिश्रियम् ।
लसदशोकवने द्रुतभाविनीं निजकथामयमूर्तिमिवास्थितः ॥20॥

स्फुटदतिमुक्तनव्यकलिकापुलकांकुरव-
द्रततिततिप्रमुग्धकुहलीबहुलालिगणः।
निजरमणीमनोज्ञकुचचूचुकमेचकभा-
मुदवहदन्वरञ्जयदमुं च रसस्फुरितः ॥21॥

स्ववधूमनुकूजिनं पिकं नवराज्ञी स्वपतेरदर्शयत् ।
सुचिरं निचितं हृदाशयं प्रवदन्ती चतुरात्मनैव सा ॥22॥

विकसद्वकुलाग्रशारिकारुतयुग्गन्धवहो हितं ववौ ।
कथयन्निव नैजसम्पदप्युरुसंस्कारमवाप्नुयादिति ॥23॥

अवलम्ब्य निजेश्वरांशुकं रमणी सा विजहार जिघ्रती ।
पवनागतकेतकीदलैः कृतसंस्कारमुदातसौरभैः ॥24॥

In Public domain. Digitization Muthulakshmi Research Academy

तत्रत्यवञ्जुलकुजे भ्रमरं किरन्तं
मारन्दबिन्दुमलिनीं च निवारयन्तम् ।
गात्वा प्रतार्य सहगायनमाचरन्तीं
सा वीक्ष्य कञ्चिदुदपद्यत भावमन्तः ॥25॥

एवं विहृत्य कुसुमोपवने मनोज्ञे
जायापतीं परिमलत्पवने मिलित्वा ।
कासारकेलिकुतुकं हृदयं दधन्तौ
गत्वा निषेदतुरुभौ सरसीप्रतीरम् ॥26॥

तीरे प्रफुल्लनवमल्लिकुडङ्गसङ्गी
भृङ्गी निनादमधुरातिमृदुप्रवाहः।
तौ प्लावयन् शुचिमनोहरवीचिकाया-
मादौ तु मज्जनमकारयदान्तरङ्गम् ॥27॥

एकेन बाहुमवलम्ब्य करेण भर्तु-
स्त्रस्तं स्तनांशुक मथेतरपाणिना च।
मञ्जीरमञ्जिनिनदैः कलहंसपुजं
सा भर्त्सयन्त्यमलिनां सरसीं विवेश ॥28॥

उन्मज्य तत्र सलिलं वदने निपूर्य
गण्डूषिणं नृपमुपेत्य सरोजपत्रम् ।
कृत्वा पुटीं जलवतीं नलिनीमरन्दै-
स्संस्कृत्य तज्जलमपाययत प्रियं सा ॥29॥

सा शैवलं जलरुहेष्वपनोदयन्ती
स्नेहेन तन्निजकचस्य च वासयन्ती ।

 In Public domain. Digitization Muthulakshmi Research Academy

स्नान्ती बभौ तनुरुचाऽम्बु विभासयन्ती
स्वाङ्गोपमेयनियतिं नयतीव तेषाम् ॥30॥

अब्जातधूलिपरिपाण्डुरदेहवल्ली
प्रान्तस्फुरत्कलमरालसतीमतल्ली ।
सा मध्यमेव सुरनागरभाषिता वाक्
रूपं गता नरपतेस्समुखं ललास ॥31॥

इत्थं तयोर्विहृतयोस्सलिले स राजा
देवीमुदञ्जलिजलैस्समताडयत्ताम् ।
पुष्पास्त्रपट्टगजराङ्करपुष्करेण
सक्रीडमात्मकरिणीमिव वारिपूरे ॥32॥

एवमविरलमवनीपतौ नवराज्ञीमुखे सलीलं सलिलस्य ।
सम्पातसहस्रं समुत्किरति समयज्ञा साऽपि च ॥33॥

"नृप! मा परिताडयोदकै" रिति वक्तुं चतुरोक्तिलीलया ।
सुरनागरभाषयाऽवदन्नृप मां ताडय मौदकैरिति ॥34॥

अनभिज्ञतया तदीयवाचां सुरसारस्वतसम्पदां नृपस्य ।
स्वसतीमतिमोदकप्रियां प्रियकेलीमिव चान्वमंस्त तैस्सः ॥35॥

ततस्तां मोदकैर्देवीं राजा भोजयितुं मनाः।
तैस्ताडयितुमालीभिः क्रीडायां निश्चिकाय च ॥36॥

गद्यम्- ततस्तस्मिन्नेव समये गगनलक्ष्मी सीमन्तसीमान्तनिष्पतदरुण सीमन्तिकाकन्दुक इव दिनकरमण्डले पश्चिमाशासागरे निमज्जति, नरपतिर्निजयुवतियुतस्स्वनिशान्तभवनमयासीत् । तदानीं च.- ॥37॥

In Public domain. Digitization Muthulakshmi Research Academy

खर्जूरतन्तुरुचिदन्तुरितैन्दवांशुप्रांशुप्रगुम्भनहसन्नवकैरवाणि।
कासारनीलनवपट्टपपटोयमानचित्रप्रसूनपटलीपटुरोचिरापुः ॥38॥

गद्यम् - क्रमेणोपचस्कार च चरच्चरमसन्ध्यारागपरभागजितहाटकस्य पूर्वपर्वत श्रृङ्गश्रृङ्गाटकस्य श्रृङ्गारभङ्गिमा। ततश्च, ॥39॥

सौत्रामीणदिशाविशालनयना सीमन्तसीमान्तर-
स्वर्णालंकृतपुष्यरागमणिवच्चन्द्रे दृशि स्पन्दिति ।
तस्या आस्यजवीटिसौरभमिलन्निश्श्वासकल्पानिला –
स्सायङ्कालभवावर्वुनवहसत्कल्हारनिर्हारिणः ॥40॥

क्षोणीभाण्डतले सुधांशु सुमनोधेनूधसो निस्सृतं
चान्द्रीदुग्धरसं रथाङ्गरमणीतापाग्निजालैर्मुहुः ।
तप्त्वा तत्र घनीभवदुचि दधन्यासज्जितं तत्प्रियै-
रादुस्वादुगभस्सिमस्तु रुचिराहारं चकोराङ्गनाः ॥41॥

कुन्दश्रीर्नवपुष्पिणी विधुशिलाराजी रसप्लाविता
जातामोदनवांकुरा मरुवकप्राञ्चल्लतामञ्जरी।
एवं जातमचेतनास्वपि पुनर्गाढं वयश्श्रीजुषां
कान्तानां किमु वर्ण्यते हृदि भवः पुंभ्यः प्रकर्षी रसः ॥42॥

वेणी कैरवमालिनी सितमणिर्लीला च लालन्तिकी
चन्द्राङ्गी कुचमण्डली मुखरमा क्षौमात्परीवेषिणी।
ज्योत्स्नायामभिसारिका युवतिषु प्रस्थानविस्तारिता
रेजुस्तद्रजनीमनोहरसुमारामेऽग्रयामाञ्चले ॥43॥

राजा तदा निजमनोहरसौधभाजो
राज्ञ्या सहान्नमुपभुज्य सपञ्चभक्ष्यम् ।

 In Public domain. Digitization Muthulakshmi Research Academy

गौदावराम्बुकणिकाभिरिवातिमन्दैः
कल्हारगन्धिपवनैः परिवीजितस्सन् ॥44॥

शय्यामुपेत्य मृदुपुष्पचयां स जानि-
रन्तर्बहिर्हृदयतस्तरुणीं निषेव्य ।
तद्वीटिगन्धिलमुखेन च चुम्बितस्सन्
सुष्वाप भूपतिरपारसुखोपनीतः ॥45॥

उत्थाय प्रियतमयोषसि क्षितीशस्तत्कालो चितविधिसंतति स कृत्वा ।
पूर्वेद्यु प्रियतरुणी मुखोत्थवाक्यं संस्मृत्य स्वमनसि सत्वरं निशान्ते ॥46॥

दासीजनेन पृथुमोदकभक्ष्यरशी-
नामोदकेन मनसा बहु कारयित्वा ।
वध्वै प्रदाय मृदु ताडयितुं सखेलं
तां दासिकाजनमुखेन जवात्प्रवृत्तः ॥47॥

सा वीक्ष्य तद्विकृतिकर्म नरेन्द्रदेवी
सम्यग्विहस्य किमिति क्षितिपं वदन्ती ।
श्रुत्वा तदाशयमतीव पुनर्हसन्ती
भर्त्रे निजोक्तिसरणिं विशदीचकार ॥48॥

ज्ञात्वा चित्रान्वयं वाक्ये कलत्रस्यावनीपतिः ।
ललज्जे स्वानभिज्ञत्वं संस्कृतस्य निनिन्द च ॥49॥

सा च परिहासवचोरेचितवदनाऽवदन्नृपं देवी।
कथमसि नाथ मनागप्यविजानन् सन्धिकार्यमपि राजा ॥50॥

इत्थं परिहसितवतीं सतीं विलोक्याऽतिलज्जितो भूपः।
शयनागारं गत्वा तत्रैवोवास राज्यविमुखम्सन् ॥51॥

आहाराहरणेऽप्युपाहरणधीगीर्वाणवाणी श्रियः,
पानीयास्वदनेऽपि संस्कृतकलाभ्यासे पिपासा बहु।
स्वप्नेप्यान्ध्रमहामहीतलपतेरस्वप्नभाषारति-
र्जाता तस्य तथा हि किं न हि फलेत् स्त्रीभिर्दृढं भावितम् ॥52॥

गद्यम् - अथ प्रसभादेव सभाभवनसमामागमनं बलात्कारादेव बलपर्यवेक्षण-मुदासीनतयैव सिंहासनासीनता अर्धाङ्गीकारेणैव राज्याङ्गरङ्गसङ्गतिरर्धाङ्गीवचना-वज्ञादूषितस्य तस्य कुन्तलकुतलपतेरभवत् । एवं महति चिन्तोदन्वतिमग्नमिव महाराजं विदित्वा विदुषा वरस्तदास्थाने सुन्दरगुणाढ्यो गुणाढ्यनामा रहस्येकदा तमुपेत्य पृथुयत्नेन विदितपृथिवीन्द्रहृदयशोककारणस्सन्नलमतिचिन्तया, महाराज! भवदीप्सिननिर्वहणभारमहं वहामीति धैर्यवचनमुदीर्य प्रोत्साहयन्नुर्वी-पतिं सभाभवनं शनैरनैषीत् । तदानीन्तु - ॥53॥

बुधेन्द्रप्रपूर्णा गुरुप्राञ्चितश्री-
र्महावैभवानार्जयन्ती जयन्ती ।
सदक्षीणलक्ष्मीकलाकोटिलक्ष्या
सुधर्मानिभा तस्य राज्ञस्सभाऽऽसीत् ॥54॥

राज्ञामणीमहास्थानी तस्मिन्नहनि भूषिता ।
शर्ववर्मादिभिर्विद्वत्प्रमुखस्सर्वतोमुखम् ॥55॥

तत्र सभ्यजनमध्यमुपेत्य प्रोक्तवान् धृतिगुणेन गुणाढ्यः।
सर्वपण्डितमहोक्षसमक्षं स क्षितीशहृदि भावमुदित्वा ॥56॥

 In Public domain. Digitization Muthulakshmi Research Academy

फणिति फणिवल्लभस्य शाब्दीं
पठितुं द्वादशवर्षसम्मितिस्स्यात् ।
समषड्कमिते वयं तु काले
नृपतिं तत्फणितौ सुशिक्षयामः ॥57॥

इति तं निगदन्तमीक्ष्य तत्र द्रुतमुत्थाय निवार्य शर्ववर्मा ।
अलमुत्कटया प्रगल्भवाचा चतुरिम्णः किमिदं निदर्शनं ते ॥58॥

अयि ! पश्य मदीयचातुरीं नरपालं परिशिक्षयाम्यहम् ।
सुरवाचि तलस्पृशं धिया लघुषण्मासमन्वितावधौ ॥59॥

स्फुटमेवमुदाय मुक्तकण्ठं बहुलोल्लुण्ठनमासने विशन्तम् ।
उपकण्ठगतं गुणाढ्यसूरिस्तमकुण्ठप्रतिवाक्यमेवमूचे ॥60॥

त्यज दम्भवचांसि शर्ववर्मन् बहुमान्योस्यतिभाषणं वितन्वन्।
सुरवाचि न केवलं त्वमेव प्रवणः, किञ्चिदहो वयं च विद्मः ॥61॥

वाणी गैर्वाणी कथमन्तर्वाणे लभेत सुलभतया ।
सलिललिपिसदृशमेव हि नृपतेस्तव शिक्षणं भविष्यति भोः ॥62॥

इति तद्वचनं निशम्य कोपात्पुनरुत्थाय तमाह शर्ववर्मा ।
किमजाकलहेन भोस्तवाहं प्रतिविद्वान् क्रियया न शुष्कवाचा॥63॥

श्रृणु त्वमिह मद्वचस्सुरसरस्वती पण्डितं
न चेद्यदि करोम्यहं नरपतिं मदुक्तावधौ ।
चरामि शिरसा वहन् महिविभागमाजीवितं
गुणाढ्य! तव पादुके बहुलनीचतापादिके॥64॥

In Public domain. Digitization Muthulakshmi Research Academy

इत्थं खण्डितवादे प्रतिजानति शर्ववर्मणि सभायाम् ।
द्विगुणीभूतस्पर्धस्स गुणाढ्योप्येवमाह शपथोक्तिम्॥65॥

यदि त्वं मासषट्केन बुधं भूपं करिष्यसि ।
शर्ववर्मन् प्रयास्यामि सर्व कर्मच्युतो वनम् ॥66॥

जननीं भगिनीं च देश्यवाचां सुरवाचं प्रकृतिं परित्यजामः ।
विजयं यदि लप्स्यसे सवित्रीमपि नश्चान्ध्रभुवां त्रिलिङ्गभाषाम्॥67॥

इति प्रतिज्ञावचनान्युभौ तौ विपश्चितौ प्रोचतुरात्तपौरुषौ ।
तथा हि यावद्यपि पाण्डिती बुधैस्समानकाले तु न सह्यते मिथः ॥68॥

अनन्तरं संसदि शर्ववर्मा नृपालकाज्ञामुपगम्य शीघ्रम् ।
तपोवनं प्राप षडाननार्चामतिस्स्वषण्मासविधानसिध्यै ॥69॥

गद्यम् - एवं तस्मिन् विदुषि तत्र तपस्तपति, नृपतिरप्येतस्मिन्नन्तरे दिग्दिगन्तराजन्यान् जन्ये विजित्य नर्मदातरङ्गिणीमणीकच्छभरुकच्छ नगरनेतारं "नहपानं" द्रव्यसमृद्धं विदित्वा स्त्रीयां प्रतिष्ठाननगरीं प्रति निवृत्तस्तत्रै-कस्मिन्नहनि मन्त्रिभिरेवमन्वमन्त्रयत, "यद्यपि वयं प्रबलबलबलिष्ठा लोकस्य धनमूलत्वात् । अक्षयधनसमृद्धः क्षहराटवंश्यो नहपानो नूनमनूनेन धनेन दलसमृद्धिमस्मद्दलादवश्यं करिष्यत एव, ततो रणेऽस्माकमवश्य एव भविष्यति, तस्मादस्माभिर्येन केन वाप्युपायेन पार्थिवं तं निर्द्धनीकृत्य समर्थयेद्विजय" मित्युक्तवति तस्मिन् रिपुकदम्बकदम्बकदलोन्मीलनकुन्ते कुन्तलस्वातिकर्णौ सर्वे मन्त्रिणस्समालोच्य राज्ञः कर्णे करणीयं विषयं विज्ञाप्य तदाज्ञामप्युपेत्यामात्यमेकं तत्कार्यसाधनाय न्ययुञ्जन्; सोऽपि दण्डकमण्डलु शाटीमुखनिखिलत्रिदण्डिवेषाडम्बरः कूटशिष्यकोट्या अविकलसकल संपत्कलावलीगुलुच्छं भरुकच्छनगरीमचर्चिकामगच्छत् । तत्र च, ॥70॥

 In Public domain. Digitization Muthulakshmi Research Academy

तत्रत्य रेवातटिनी तटाग्रे कुटीरमाकल्प्य सशिष्यकोटिः ।
तदग्रवाटीविटपिप्रकाण्डस्याधो बकध्यानमनीनटत्सः ॥71॥

यातायातप्रजौघाः परमयमिनमित्यन्तरङ्गेषु मत्वा
कर्णाकर्णिप्रसक्तां झडिति पुरि मिथस्तत्प्रवृत्तिं ब्रुवाणाः ।
भिक्षादानेन केचित्फलकुसुमनवीनोपहारैश्च केचि-
त्केचित्पादोपचारैर्धनकनकमणिभ्राजिता भेजिरे तम् ॥72॥

कान्ताः कान्तालिकाक्रान्तपादुकान्तास्तमन्तिके ।
सन्तानैरर्थसन्तानैरसेवन्त निरन्तरम्॥73॥

काचित्कुम्भस्तनी तन्मृदुपदयुगलीमभ्यषिञ्चिज्जलौघैः
काचिद्भक्त्या लताङ्गी करटघटितैरर्चयामास पुष्पैः ।
काचिन्नीलाब्जवेणी व्यजनयुतकराऽचालयच्छीतवातान्
काचित्पद्माननाऽदान्मधुरमधुसमानीय पानीयमिश्रम्॥74॥

गद्यम् - एवं कतिपयवासरेषु गतेषु, - ॥75॥

रामारज्जुपरम्परा शठयति प्रागल्भ्यभाण्डे मुहु-
र्लग्ना सानहपानराजमहिषीहृद्भावकूपान्तरम् ।
नीत्वा तत्र समृद्धसम्मदरसं तं योगिनं प्रापयत्
दम्भस्त्रीजनपामरान् खलु गुणश्शीघ्रं समाकर्षति ॥76॥

क्रमेण राज्ञी नृपमेनमीक्षितुं सहात्मना प्रैरिरदन्वमंस्त सः ।
तथा हि यावानपि विश्वनायकः प्रियानिबन्धं शिरसा वहेत्खलु ॥77॥

अथैकदात्मीयसतीयुतो नृपश्शठं यतिं द्रष्टुमनास्समाययौ ।
सबन्धुदारस्स पुरासुरो हरिं विलोकनार्थादिव बुद्धवेषिणम् ॥78॥

In Public domain. Digitization Muthulakshmi Research Academy

विलोकयन्नेव पदेऽनमन्नृपो यतिस्स नागयणाम चास्मरत् ।
प्रियंकरोऽपृच्छदनामयं च तं जवेन मिथ्याऽऽद्रियते हि वास्तवात् ॥79॥

गद्यम् - ततः प्रभृति नरपतेर्यानायानभिक्षदानपादपूजनादिना यतिनाऽतीव सम्बन्धबन्धस्सम्भभूव। प्रचलन्ति स्माऽन्वहं नर्मदानदीकूलकदम्बकुसुम कुड्ङ्गवाटिकायां स्वामिनः प्रातर्गीतादिप्रवचनानि सायाह्ने धर्मोपन्यासाश्च। अथ कस्मिंश्चिद्दिवसे स वशीकपटः सविधवासिनो निरन्तरधर्मचिन्तादन्तुरितान्तरङ्गस्य यत्किञ्चिदपि कार्यमाचरितमविरतापेक्षमाणस्वानुज्ञस्य राज्ञो मतिं विज्ञाय समयज्ञस्स यज्ञं महान्तं कञ्चित्कर्तुमाज्ञपयामास । सोऽपि राजा परिव्राजिकाज्ञां शिरसि धृत्वा भृत्यामात्यहितपुरोहितपौरवृन्दबन्धुबन्धुरस्सन् तदाज्ञप्तसप्ततन्तुमचिरादेव देवीसमेत आचरितुमारभत ॥80॥

कुहनायतिवायुचोदिते नृपमेघे बहुदानवर्षिणि।
सवनाख्यसरोवरे रमा प्रययौ दुस्स्थितपद्मतो बहिः ॥81॥

गद्यम् - अथ च - ॥82॥

अथ राज्ञः ऋतौ पूर्णे पूर्णानुस्वारिते धने ।
चातुर्यान्मुनिरायासीच्चातुर्मास्यव्रतच्छलात् ॥83॥

गद्यम् - एवं स मन्त्री कुन्तलेन निमन्त्रितं तन्त्रं साधु साधयित्वा स्वधात्रीं गत्वा तत्र साधितं सर्वं राजकार्यं भूभुजो मन्त्रिणां च समक्षमाचष्ट । राजाऽपि प्रशंसा पूर्वकं मणिकाञ्चनसमृद्धैरर्थैर्यथोचितं तं बहु बहुकृत्य कृत्यशेषनिर्वहणायाशेष सेनापतीनाकारयित्वा भरुकच्छनगरजैत्रयात्रानियमितं समयमुक्त्वा तान्ससैन्य ग्रामं संग्रामाय सन्नद्धीचकार ॥84॥

इत्थं सन्नद्धीकृतसेनानीः कुन्तलान्ध्रभूजानिः ।
अनुगच्छद्बन्धुयुतो भरुकच्छपुरीं ययौ रिपुं जेतुम्॥85॥

In Public domain. Digitization Muthulakshmi Research Academy

अरं सरत्तुरङ्गसत्खुराग्रजं धरारजो
व्रजद्गनव्रजाङ्गदानवास्सृतं सुदूरतः ।
तदध्वनि ध्वनिस्फुटं नटद्भटैकसत्वयु-
क्छताङ्गश्रुङ्गसङ्गतं चलाञ्जनाद्रिवद्बभौ ॥86॥

गत्वा स नर्मदातीरे निर्ममे दलवीथिकाः ।
तत् ज्ञत्वा नहपानस्त मरुणद्बलदर्पितः ॥87॥

तत्रोभयोर्बभौ युद्धो नर्मदातटिनीतटे ।
तद्ब्रह्मक्षत्रयोर्मध्ये भार्गवावर्जुनयोरिव ॥88॥

तथैव निहते युद्धे नहपानेऽन्ध्रभूभुजा ।
भरुकच्छं वशीकृत्य पताकोप्युदपाति च ॥89॥

ततः प्रतिष्ठानपुरीं ययौ स श्रितप्रतिष्ठानवमानितश्रीः ।
चकार चान्ध्र्या उपराजधानीं सपल्लिकां तां मरुकच्छलक्ष्मीम् ॥90॥

गद्यम् - अस्मिन्नन्तरे शर्ववर्मा हिमगिरिराजनन्दिनीनन्दनं स्कन्ददेवमस्पन्द सान्द्रतपसा प्रसन्नीकृत्य तदुपदिष्ट "कातन्त्र" नामव्याकरणतन्त्रमुपलभ्य क्षितिपतिमुपेत्य कुमारदेवप्रसादादेव षण्मासावधावेव तं सुरवाचि सुशिक्षयाञ्चकार ॥91॥

आढ्यो यथार्थवचनेन गुणाढ्यसूरी
राज्ञा प्रियेण बहुधा विनिवारितोऽपि ।
स्वे चक्षुषीव निजदेहमिव प्रमुच्य
स प्राकृतामरगिरौ प्रययौ च देश्याम् ॥92॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् - ततः कुन्तलस्तलस्पर्शिपाण्डितीभावमुपपन्नस्सुरसारस्वते सूरिजन भूरिसत्कारौचितरसविशेषज्ञस्स शर्ववर्माणं सर्वपण्डितसमक्षमुचितासने सभाभवनमध्यमध्यासीनं कृत्वा, ॥93॥

प्रणम्य शिरसा तस्मै भरुकच्छपुरीं ददौ ।
सर्वज्ञेनाऽपि शिरसा कलावान् भूष्यते खलु ॥94॥

इत्थं सन्तानीकृतजनसन्तानश्रिश्रतार्थिसन्तानः।
सन्तानितपाण्डुयशास्संस्तेने कुन्तलोऽन्ध्रभूराज्यम् ॥95॥

आस्थाने परिपूजिताऽस्य नृपतेरेतेन कार्षापणैः
गैर्वाणी कृतिरूपिणी शुचिरपि ब्रह्मो सुवर्णायिता ।
कीर्तिस्त्वस्य दिगन्तरालगमने तस्या मरालीसमा-
प्यामोदातिशयादवाहि सविपर्यासं तयैवाद्भुतम् ॥96॥

एवं जयश्रियं वाणीं वक्षसा वचसा वहन् ।
विधुवद्विधिवद्भूमिं विधिवत्सोऽन्वपालयत् ॥97॥

गद्यम् - ततः कुन्तलसातवाहनः पूज्यां स्वराज्यश्रियमष्टवर्षसम्मितां तद्धौरन्धर्यदक्षाय सकलकलातलस्पर्शिने **स्वातिकर्णिनाम्ने** कुमारकण्ठीरवाय दत्वा यथोचितं तपोवनमवाप ॥98॥

स स्वातिवर्णस्समवाप्य धात्रीं शशास भूमिं शरदेकसङ्ख्यम् ।
सङ्ख्येषु सङ्ख्यातिगशत्रुपक्षध्वान्ते भुजाकल्पितपूर्वपक्षः ॥99॥

गद्यम् - तस्य भूजानेरजनि रजनीकर इव सागरस्य जनेः फलं **पुलोमाविनामा** कुमारमूर्धन्यः; सोऽपि सार्वभौमश्चतुर्विंशतिसमाः

In Public domain. Digitization Muthulakshmi Research Academy

असमानमानितधर्मा क्षमां रक्षित्वा **नेमिकृष्णनाम्ने** तनुजन्मने त्रिसमुद्रमुद्रितां समन्ततस्सामन्तभूनाथदत्त करभागधेयमेदुरां मेदिनीमदात् ।100॥

नेमिकृष्णधरणीवरचन्द्रस्सान्द्रकीर्तिरुचिशीतलचान्द्रीम्।
पञ्चिविंशतिशरन्मितराज्यं प्राज्यकालशरदि व्यकिरत्सः ॥101॥

हिमनगमृगकस्तुरी शङ्कस्तनुवज्रपञ्जरे कीरी ।
शरवणभवजलबिन्दोः स्वाती कादम्बिनी जयतु गौरी ॥102॥

इति श्रीमदुभयभाषासनाथ द्विभाषि सोमनाथकृतौ
राजरत्नमालायां चतुर्थ रत्नम्

****

In Public domain. Digitization Muthulakshmi Research Academy

पञ्चमं रत्नम्

श्री कामेश्वर्यै नमः।

द्विभाषि सोमनाथकृता श्री राजरत्नमालाचम्पूः

श्रीराजच्चरणाम्बुजातविगलन्माहात्म्यमाध्वीरसा
साध्वीराजिसराग्रनायकमणी राजद्दयावाहिनी ।
वाचं सत्कविमोहिनीं मम कृतावस्यां रसस्पन्दिनीं
दद्यात्पर्वतनन्दिनी कुलगता कामेश्वरी नस्सदा ॥1॥

अथ प्रथावर्धितनेमिकृष्णः रथस्य नेमिर्नयधर्मनाम्नः।
पराङ्गनावर्णनवर्णशून्यस्स रिक्तवर्णोऽभवदन्यनाम्ना ॥2॥

गद्यम् - अपि च स रिपूणामरिष्टकर्माचरणतयाऽरिष्टकर्मेति परनिन्दावचना-कर्णनाभावतया रिक्तकर्ण इति च प्रतीतिमवाप ॥3॥

तस्याऽजनिष्ट निजनिष्ठितधर्मभूज-
भ्राजत्फलं च तरलः कुलहारयष्टेः ।
विद्वच्चकोरपरिपोषणशीतरश्मिः
पुत्रो वसन्तसदृशस्सुमकोमलीनाम् ॥4॥

बालोऽप्यभूत्प्रतिमहीपतिशौर्यरोचि-
हालाहलाहरणकौशलनीलकण्ठः ।
लीलावलीढदिगिभिः करभैस्स्वकीयैः
हेलैकजैत्रगमनेषु स एव हालः ॥5॥

बले हली, दानगुणे बलिस्स राट्
कलावलीषु प्रतिमान् फणीशितुः ।

 In Public domain. Digitization Muthulakshmi Research Academy

सुकाव्यमाधुर्यरसोपगुम्फने
स, नाकुजन्मा मधुनस्सहोदरः ॥6॥

स पूज्यपादस्य निदेशतः पितुस्स्वराज्यपीठे विनिवेशितोऽभवत् ।
किरीटमाणिक्यकराङ्कुरातपोन्मिलन्नृपालोकविभातचन्द्रिकः ॥7॥

न युक्त इत्यन्यनराक्षिगोचरः प्रयोजनैरेव निजैस्तमार्चिषुः ।
नृपोपहारैर्भविकैः कविस्तवैः रमावराङ्गी च शिवा च भारती ॥8॥

धनञ्जयश्रीविभवे धनञ्जयप्रथा यथैवानलसव्यसच्चिनोः ।
तथाऽऽसतुर्द्वौ भुवि रूढिसङ्गतौ हली च हालो हलकर्मवर्धने ॥9॥

हरिचन्दन एव चन्दनद्रव एवैष गुणैस्सुगन्धिलैः ।
स नराधिपलोकशेखरश्शरधिर्दाशरथिर्दयारसे ॥10॥

नयतो नृपतिस्स धर्मराण्णतु बाधाचरणस्स धर्मराट् ।
अरिकण्ठ विलुण्ठनेऽर्जुनो न स विप्रर्षिनिषूदनोऽर्जुनः ॥11॥

गद्यम् - स एवमवन्नवनिमवनीपतिः कस्मिंश्चित्प्रभातसमये सकलसामन्तमन्त्रिहितबान्धवयुतो मरकतमणिशकलमुकुरनिकरविकीर्यमाण-किरणकन्दलरुचिनिचयविलीनतनुरोचिरञ्चितैर्मुखामुखमात्रप्रतीयमानैर्वलभी-शुकशकुन्तसन्तानैर्निरन्तरशोभादन्तुरे, अभ्यासवशादसकृदुच्चरितस्वागतसभा-जनवचनरचनाविस्मापितसभागतजननयनपंक्तिकाभिर्मञ्जुलपञ्जरशारिकाभि-रभिरामरमाकरे, सुरेन्द्रनीलमणीघृणीविकचरुचिनिचितासितकुट्टिमस्थल-विलिप्तनीलिमाऽतनुतनुभिर्निषण्णप्रजाभिरुपगतविश्वरूपनारायणोपमाविलास भासुरे, महासभाभवनान्तरे चन्द्ररेखाभिधानगणिकामणिकान्तपदकिङ्किणीघ-लंघलध्वनिमनोहरं, मृदङ्गमृदुगम्भीरनिनादमेदुरं, वादितवीणारवादनिर्णयनव-कोमलसङ्गीतसङ्गत-गीतिकामधुरकण्ठीभिर्गणिकाकलकण्ठीभिरुपगीयमानं,

In Public domain. Digitization Muthulakshmi Research Academy

तालमानानुगुणं, सर्व सदस्यवश्यं, लास्यमवधारयन् सकलसुकविकोकिल-श्लोकितश्लोककूकूकूजितं वसन्त इवावतंसयंस्तांस्तान्हारिमणिहारादिभूरि-पारितोषिकैः परितोषयन्नास। तदा चन्द्ररेखाया बहुवसुबहुमानसमये, रसमयेडितवर्णनीयवर्णप्रकल्पनामल्प-सुषमाप्रणीतद्रष्टृजनमनोऽनुरागं तस्याः अङ्गरागं वीक्ष्य "केनायमद्भुतरचना-कल्पशिल्पिना चित्रणाभोगः अङ्गरागस्तवा-कल्पितः" इति विदूषकवरेण पृष्टा साऽपि सस्मितमार्यवर्य इतः पूर्वमित आगतेनास्मत्सार्वभौमरूपं फलके विलिख्य तत्फलकमादाय स्वकीयं सिंहलद्वीपं गतेनैव चित्रकारेण मत्प्रार्थितेन ह्यः पुनरागत्य अस्मन्निकेतने शरच्चान्द्रीकान्त-चन्द्रकान्तकुट्टिमस्थलसीम्नि स्थित्वा साभिनवकौशलमभिकल्पितः" इत्युक्त्वा गृहीतबहुकृतमणिधना सा शिरसा प्रणम्य स्वकं निकेतनमगात्। ततो नीत्वा कञ्चित्समयं स भूपतिरपि सभां समाप्य प्रविष्टकवितारसमानससुखप्रशान्तो निशान्तभवनमवाप । अपिच, ॥12॥

स शातकुम्भाञ्चितकुम्भगुम्भितैर्हिमाम्बुभिश्चन्द्रमुखीकरार्पितैः ।
विरच्य माध्याह्निकहारिमज्जनं जनाधिपोभ्यर्च्य गृहे जनार्दनम्॥13॥

उपभुज्य मृष्टभोज्यं भोजनमनुभूय शयनविश्रान्तिम् ।
मन्त्रिवरं तत्रारेणानाय्य निकाय्यमेवमाचख्ये ॥14॥

"कोऽयं स चित्रकारो गणिकाफणिताङ्गतगकार" इति ।
सोऽपि नमस्कृत्य विभुं तमभिभाषे सुशेमुषीविभवात् ॥15॥

गद्यम् - हालभूपाल! स तु चित्रकारणश्चित्रकारस्सिंहलादागत इत्यस्माभि रश्रावि; बहुशस्तद्देशराजन्यस्य प्रणिधिरेवैष भवेत, भवतु नाम! सिंहलात्पुनरागतस्सोऽद्यापि अस्मत्प्रतिष्ठानपुरेऽस्मिन् प्रतितिष्ठेत; चन्द्ररेखां रहस्यानाय्य मणिमण्डनादिभिस्तोषयित्वा तस्य रहस्यसर्वस्वं वेदितुं तां

 In Public domain. Digitization Muthulakshmi Research Academy

वेश्यामेव प्रचोदयामीत्युक्त्वा राजानुमतिमेत्य मन्त्रिमुख्यस्तां वारमुख्यां तस्मै मर्मकर्मणे प्रेरयांचक्रे; सापि च स्वकीयं प्रासादमासाद्य, ॥16॥

सुमनःकमनीयकेतकीसुमपत्रैः परिकल्प्य वेणिकाम् ।
प्रतिदर्शय दूरुसौष्ठवं वसनं सूक्ष्मतरं च बिभ्रती ॥17॥

चीनीतन्तुचयोतचित्रकुसुमव्याख्याऽऽयरत्कञ्चुका
किञ्चिन्मुञ्चदञ्चितांशुकतया सामीक्ष्यमाणस्तनो ।
चर्चाचन्दनसौरभं स्थवपुषोपन्यासिनी सा तदा
चित्रं चित्रकृतोऽग्रतस्स्मरकलाजन्या रजन्यां बभौ ॥18॥

भ्रूविक्षेपान्मदनं प्रबोधयन्ती तदन्तरे गाढम् ।
मीनमिथुनोपमाक्षी क्षणाद्वशं चित्रकारमतनिष्ट ॥19॥

गद्यम् - सोऽपि चित्रकारस्तां वारयोषां स्मेराङ्कुरपरम्परालसगमनादि-विलसनै श्शनैश्शनैरारूढमन्मथस्तां स्वाधीनां ज्ञात्वा रहसि सोपलालनमालिंग्य तदङ्गशुचितर-सङ्गमसुखमखर्वमनुदिनमनुभवति स्म। एकदा निशायां वेश्यावश्यस्स शिल्पी तल्पभागे भोगिनीप्रसादित मधुरसं रागरसेन साकं स्वीकृत्य मत्तो मत्तकाशिन्या तथा पृष्टः स्वस्यागमनवृत्तान्तं सान्तमेवमफणीत् - "अस्ति नस्सिंहलद्वीपे भूपालमुकुटमण्डनश्शीलमेघनामा सार्वभौमः। एकदा स तरुणस्सायन्तनसमये रमणीयपुरोपकण्ठसहकारतरुवरन्मृदुलहृदयङ्गमपवने निजोपवने विहरन् तत्रत्य सरसोरोधसि छद्मना मानुषीभृतां पद्मेव मनोरमां पद्माभिधानां कांश्चिद्दिव्यमानुषीं कन्याम् अनन्यलावण्यभद्रामद्राक्षीत् ॥20॥

सिंहलेन्द्रस्स तां कन्यां शीलमेघं च सा वधूः ।
दृष्ट्वा मिथोनुरागार्द्रौ आसतुर्हृदयान्तरे ॥21॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् - तत्र उभयोर्विदितान्योन्यकुरुगोत्रादिवृत्तान्तयोः पद्माभिधानदिव्य मानुषीशीलमेघयोरासीद्गान्धर्वविधिविहितो विवाहः ॥22॥

अथ नवनवयौवनोदयश्रीकलितकलाप्रमदौ वनान्तरे तौ ।
विहृतिमकुरुतां मनोनुरागात्प्रसवलतायतडोलिकानिकाये॥23॥

पद्मायाश्चाथ तद्राजः कन्या पद्मालयोपमा ।
पद्मिनीजनिगन्धाढ्यगुणा लीलावतीत्यभूत् ॥24॥

सा कन्या परिवर्धिता पितृगृहे निक्षिप्य पृष्पोत्करे
तस्याश्च क्रमशस्सुशीलमनसा साकं वयः पुष्पितम् ।
यानं मन्दितमानतज्जवगुणं क्षिप्त्वा चरित्रप्रथा-
स्वेवंरूपवयोनुरूपसुमतिर्लीलावती जाग्रती ॥25॥

एकदा प्रमदायुक्ता चरन्ती प्रमदावने ।
दासीं कांश्चिदपश्यत्सा हालाया रसपायिनीम् ॥26॥

गद्यम् - लीलावती कुमारी तां दृष्ट्वा "अये! नैष युक्तोऽस्मद्दास्या आर्यनिन्दितो हालारसास्वादः" इत्यवोचत् । सापि चतुरा दासी "कुमारि! राजपुत्रि सर्वथाऽहं शिक्षणीयाऽस्मि संवृत्ता भवत्या, तथापि यदि क्षमिष्यसे किञ्चिद्वच्मि स श्रूयतां तावत्, ॥27॥

हालापवर्जमिह ते न हि याति शोभां
बाले नवाऽतिमधुरा प्रमदा सलीला ।
इत्यन्यमर्थमुपपाद्य दरं हसन्त्या
ज्ञात्वा तदर्थमवराऽऽह नृपालपुत्रीम् ॥28॥

गद्यम् - कुमारि! इतो मासादूर्ध्वं तवानुमतिमासाद्य अस्मदाप्तबन्धु नन्दिनीविवाहं पुरस्कृत्य, एषाप्यहं च प्रतिष्ठाननगरीमगमाव । तत्र बन्धुमन्दिरालिन्दद्वारे एनया सार्धमहं स्थित्वा, अधिष्ठितसप्ताश्वोह्यमानस्यन्दनं, सप्ताश्व इव विराजमानं, व्रजन्तमान्ध्रराजराजं, हालनामानं वीक्ष्य, "अस्मत्प्रियसख्या भवत्या स एव कुमारसार्वभौमो युक्तः पाणिग्रहणाये"त्यावां मिथस्सल्लापमकरवाव । तमेव विषयमुद्दिश्यैषा धूर्ता इदानीं त्वां छलोक्त्या "हालापवर्ज्यमिति" प्रतारयन्त्यगादीत्। एवं वदन् स चित्रकारः पुरस्स्थां चन्द्ररेखां पुनरेवमाह! 'अहं तु तस्मिन्नेव समये सिंहलेन्द्रस्य शीलमेघस्य निदेशेनान्तःपुरभवनाद्बहिः कुड्जभागं चित्रवर्णैश्चित्रयन्, तदन्तरे वर्णान्तरालेपनाय कूर्चिकाः प्रक्षालयितुं प्रमदावनबहिः कुड्गभागे मृदुपवन चलत्कुमारतरङ्गपरम्परास्फालिनि, तत्रत्यतामरसरस्यवतीर्य कूर्चिकाः परिक्षालयन्, मदुक्तमिदं तासां सम्भाषणमश्रौषम् । ततोऽहमासायन्तनं सान्तं तत्र चित्रीकृत्य कुड्जप्रदेशं निजनिवेशमयाशिषम्। तस्यामेव रजन्यां रहस्यागत्य, कयाचिद्राज-दारिकापरिचारिकया एवमफाणि! "श्व एव त्वया प्रतिष्ठानपुरीं गत्वा तद्राजन्यस्य हालचक्रवर्तिनो रूपं फलके विलिख्य, निगूढमानेतव्यम्। द्रव्यमप्येतन्मणि-काञ्चनाञ्चितमादातव्यम्" इत्युक्त्वा बहुवसुमहोदात्तं वित्तं मत्करे निक्षिप्य क्षिप्रमयासीत् । सोऽयमहं परेद्युरत्रागत्य त्वया सह परिचयमवाप्य तद्बन्धुरिति व्यपदेशेन राजसभां प्रविश्य समीक्ष्य नरपालं हालं अत्रैव तद्रूपमभिलिख्य सिंहलमगमम् । अदापयं च रहसि राजकुमार्यै चित्रितं हालरूपचित्रम् ॥29॥

आसीद्वीक्ष्य रसान्तरा नरपतेश्चित्रं घृणीमण्डली-
सम्पर्कं दधतो नवैन्दवमणी चन्द्राद्यथा स्यन्दति ।
किन्त्वन्तः परिशङ्कितं सुरुचिराप्यात्माकृतिस्तत्प्रिय-
प्रीतिं यास्यति वा नवेति न धृतिं सा याति लीलावती ॥30॥

गद्यम् - एवं गतेषु कतिपयेष्वेव वासरेषु, रहसि लीलावतीचित्रफलकमादाय, सैव दासीसरसीजमुखी मद्गृहमागत्य, मां मिलित्वा "त्वया पुनः प्रतिष्ठानपुरीं गत्वा चतुरमतिना लीलावतीचित्रफलकमिदं मिथः प्रदर्श्य हालनरेन्द्राय तदाशयोऽवगन्तव्यः" इति पुनर्मणिगणमौक्तिकमाल्यान्यमूल्यानि मह्यं दत्वा आयातेनैव पथा साऽयासीत् । अहंत्वितः पूर्वमेऽवाङ्गरागप्रकल्पनाय त्वया प्रार्थिततया पुनरत्रैवाऽऽयासिषम् । अयं मे वृत्तान्तः, चन्द्ररेखे! यथा कथंचिदपि निगूढमेतत्फलकमस्मद्राजनन्दिन्याः हालभूपालविलोकनपथं त्वयैव प्रापणीयम्, अस्मत्प्रार्थनामपि तस्मै निवेद्य तन्मनोगतमपि मह्यमावेदितव्यम्" इत्युक्त्वा फलकं वारवधूवतंसितायै चित्रकारः प्रादात् ॥31॥

सा चन्द्ररेखा सहसा गृहीत्वा
लीलावतीरूपमवेक्ष्य दिव्यम् ।
मुहुर्मुहुर्लोचनतस्स्पृशन्ती
सम्मील्य हस्ताम्बुरुहे नमन्ती ॥32॥

गद्यम् - "अहो! भाग्यमेतद्विश्वमङ्गलतनूलीलावतीर्णा लीलावती यदि नः पृथिवीपतेः कलत्रं भवेत् कथमिव न कुर्वेऽस्मद्राजकार्य"मित्युक्त्वा, परेद्युरेव भूवल्लभप्रधानामात्यमेत्य, रहसि विज्ञाप्य च श्रुतसर्ववृत्तान्ताय तस्मै फलकं प्रायच्छत् । मुख्यामात्यस्समीक्ष्य फलकं अये अयाचितलब्धं महाफलमिदं हालभूपालस्य ॥33॥

अस्माकं हालविभोः परिणययोग्या सुकन्यका लब्धा ।
तरलांगुलीयकस्य स्थगयितुमिव पद्मरागवररत्नम् ॥34॥

गद्यम् - भवतु, सर्वथा प्रयतिष्ये लीलावतीं परिणाययितुं सार्वभौमाय" इत्युक्त्वा चन्द्ररेखां यथोचितपारितोषिकैः प्रेषयामास । चित्रकारोऽपि चन्द्ररेखया

विदितामात्यमनोभावस्सन् सिंहलं गत्वा राजसुतायै, लीलावत्यै निवेदयाञ्चक्रे॥ ।35॥

अथाऽत्र हालेश्वरमुख्यमन्त्री मिथो धरित्रापतिना निवेद्य ।
यथाकथं वापि सुतां गृहीतुं विभोस्समालोच्य च सिंहलस्य ॥36॥

विजयैरभिनन्दितश्रियं विजयानन्दमनिन्दितोजसम् ।
अवनीपतिदण्डनायकं जवमानाय्य स मन्त्रिसत्तमः ॥37॥

समक्षं क्षितीशस्य तस्याऽऽज्ञयैव
क्षतद्विष्महीपालचक्रं दलेन्द्रम् ।
विलोक्य त्वमद्यैव गत्वा करं न-
स्समादाय तत्केरलेन्द्राच्च पण्ड्यात् ॥38॥

ततो दक्षिणवाराशितीरं भूरिदलान्वितः ।
यात्वा सागरमुत्तीर्य सिहलं रंहसा व्रजेत् ॥39॥

यात्वा तं सिंहलेन्द्रं मृदुतरवचसा सिंहलाङ्गूलवेणीं
कन्यां तस्याभिजात्यप्रकटगुणमणीं दातुमापृच्छ राज्ञे ।

प्राज्ञश्चेदेव दास्यत्यनुपदमथ वा नो स दास्यत्यरं चे-
द्युद्धे जित्वाऽऽनयेत्तां प्रतिभटमभदामन्ध्रसेनां प्रचोद्य ॥40॥

इत्युक्त्वा विजयानन्दं पोट्टिसं चान्यमन्त्रिणम् ।
वाहिनीं तत्क्षणे दत्वा प्राहिणोद्दक्षिणामुखम् ॥41॥

नीरन्ध्रमान्ध्रसैन्यं तेजोरेखेन्धनद्रिपुमहीन्द्रम् ।
नीत्वा विजयानन्दः प्रययौ पोट्टिससमायुतः पाण्ड्यम् ॥42॥

आयायिनं तमनुयायिजनैस्स्वकीयैरावेद्य पाण्ड्यनृपतिस्सकलातिथेयैः ।
प्रत्युद्गतः पुरबहिर्गतगोपुराग्रे सम्पूज्य राजभवनं सविनीति नीत्वा ॥43॥

आपृच्छ्य हालनृपतेः कुशलं विशदं सबन्धुवर्गस्य ।
दिवसानि कतिपयान्यथ निवेशयंस्तौ यथार्हसत्कारैः ॥44॥

दातीव स्वस्य तेजोऽरुणरुचिनिचितान् पद्मरागानानर्घान्
सक्तां सत्कीर्तिपूर्णश्रियमुपनयतीवान्ध्रदेवं सुमुक्ताः।
कल्यं कल्याणजातं बहुमिति दिशतीवातिकल्याणजातं
प्रादाद्बद्धाञ्जलिस्सन् करधननिकरं भूरि शोभाकरं सः ॥45॥

आदाय करधनं तौ विजयानन्दश्च पोट्टसो मन्त्री।
पवनचलनारिकेरं केरलमभिरामभूपदं ययतुः ॥46॥
निविश्य तत्रत्यवने मनोहरे दलैरुभौ पोट्टिसदण्डनायकौ।
समर्चितौ केरलराजतज्जनैः तौ चैत्रराथौ मलयानिलैरिव ॥47॥

चन्दनतरुसान्द्रतरान्नन्दितकमनीयनन्दनविभगान्।
लाङ्गलपद्धतिरङ्गल्लाङ्गलिवनवाटिकाश्च पश्यन्तौ ॥48॥

गद्यम् – मयलयमहीवलयपतिसमर्पितपटीरहीरहारादिकराकारवस्तु-प्रकरमादाय, विहाय केरलप्रदेशं दलावलीभिस्सह पोट्टिसविजयानन्दौ दक्षिणसरित्पतिप्रतीराभिमुखं प्रतस्थाते। ततश्च, ॥49॥

निषेवमाणावगुरुदुमाणां कषायगन्धान् पथि काननेषु।
सुपुष्पितानां नवमागधीनां उपात्तगन्धानपि गन्धवाहान् ॥50॥

द्रुशाखिकोत्तानितलम्बमर्कटीस्वकुक्षिडोलाशयिताभिर्कैर्वनैः।
विनोदिनौ सारससारसश्रिया ह्रदान् सरासान् सरसान् विलोक्य च ॥51॥

 In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् - क्रमेण तौ प्रचक्रेण परिक्रामन्तौ, भूमिसीमन्तिनीकौशेय-चेलाञ्चल नीललाञ्छनमिव दूरात्परिदृश्यमानवेलाञ्चितरेखां, स्वकीयागमनमा-वेद्य सम्मदवता सरित्परिना प्रेषितानीव, स्वागतपत्राणि, समुल्लसद्भिरुत्तुङ्गतरङ्ग संघातजातप्रौढ मारुतपरंपराविकीर्यमाणैः, तीरकान्तारकान्तकेतकीपत्रसन्तानैः सन्तानितसन्ततामोदमादधानां रघुरामकरुणरसारामचरणसारसविन्यास पवित्रितप्रांशुसितपांशुमहनीयसिकतामयप्रदेशभासमानामखिलदुरितनिकरगिरि कोटिशतकोटिमुत्तालतालतरुनारिकेरवाटीं धनुष्कोटिमवापतुः ॥52॥

एवं दलैरविरलैरुपगम्य सिन्धुं तीरप्रदेशविनिवेशितसर्वसैन्यौ ।
नीत्वा निशान्तरमुभावपि तत्प्रशान्तं प्रातः प्रबोधिदलतूर्यरवैः प्रबुद्धौ ॥53॥

अम्भोधेरम्बुनि स्नात्वा दत्त्वार्घ्याण्यब्जबन्धवे ।
सिन्धुतीरे पुरः कार्यं तयोरालोकमानयोः ॥54॥

गद्यम् - मन्त्री पोट्टिसो विजयानन्दमाह ! "अयि प्रियसख! विजयानन्द! नैव युक्तमद्य सैन्यसञ्जातेन साकं समुद्रमुत्तीर्य आवयोस्सिंहलगमनं; किन्तु, दूतं कञ्चित् प्रेषयित्वा वक्तव्यैर्वचनैः सिंहलेन्द्रेण शीलमेघेन शान्तमेव सान्तं साधनीयमस्मत्कार्यम् । स चेन्नाङ्गीकरिष्यत्यस्मच्चक्रवर्तिने लीलावतीं दातुं ततो द्रक्ष्यामस्तावत्पुरः कार्यक्रम" इति । एवं मन्त्रिणि पोट्टिसे सामोपायेन प्रपञ्चित निजाभिप्राये प्रभुभक्तितत्परो विजयानन्दः प्राह "अयि, सखे । पोट्टिस! साधु, निपुणमतिना फणितं भवता । तदहमेव निर्वर्तयिष्ये तमशेषं कार्यविशेषम्" इत्युक्त्वा सैन्यं, पोट्टिसञ्च स तत्रैव संस्थाप्य तस्मिन्नेव समये नौकामेकामानाय्य, एक एव, तेन सिंहलं प्रति प्रतस्थे । तत्र, ॥55॥

भङ्गाभङ्गसमुल्बणे जलनिधौ नौमध्यमध्यासिता
गच्छन्नन्तरमत्स्यकच्छपतनूभूबुद्बुदैरर्बुदैः ।

In Public domain. Digitization Muthulakshmi Research Academy

आतुन्दं परिलम्बिनः प्रतिसरान् नारायणोरस्स्थितान्
नीलान्नीलमणीचितान् स विजयानन्दो मनस्यौहत ॥56॥

प्लवोपरिष्ठादुपविश्य नीरादाकर्षिता धीवरकन्यकाभिः ।
तद्दृष्टिभीता इव सम्भ्रमन्तो विलोकिता जालविलग्नमीनाः ॥57॥

एका समुद्धूय तरङ्गरेखा विभङ्गिता फेनमथोत्किरन्ती ।
पश्चात्तरङ्गोपहिता बभासे मञ्चे हरेर्मौक्तिकजालिकेव ॥58॥

एवं नौरम्बुधेर्मध्यमविशद्यन्त्रिता जवात् ।
कादम्बिनी वियन्मध्यं जञ्झाऽऽकृष्टा क्षणादिव ॥59॥

तत्राऽब्धिमध्यमुपगम्य विशालनौका
पश्चात्क्षणं सलिलकल्पितदीर्घरेखा ।
नीरं पुरः परिविभज्य जवातिरेका-
द्घोषैर्दधाव विचलज्जलजन्तुलोका ॥60॥

एवं नावि जवात्तत्र धावन्त्यां भूरि मारुतः ।
महारुतो घनैर्मेघैरकस्मादागतो ववौ ॥61॥

मारुतप्रेरितो मेघगर्जगम्भीरनिस्स्वनः ।
भर्त्सयन्निव हुङ्कारैस्सिन्धुगर्भात् प्रतिश्रुतः ॥62॥

स्थूलमौक्तिकदामानि नीलप्राङ्गणसीमनि ।
लम्बितान्यम्बुदोल्लोचादिव धारा बभुर्जले ॥63॥

उद्यद्विद्युत्प्रकाशानुपदमुपरितस्सम्पतद्वज्रघोषा
नीरासारास्तदन्तश्चिटपटनिनदोत्कर्षवर्षोपलौघाः ।
मेघाच्छादान्नभोऽन्तर्दिशि दिशि निबिडध्वान्तराशिश्च निन्यु-

 In Public domain. Digitization Muthulakshmi Research Academy

भ्रान्तिं, सङ्कोचभावं विकलित विजयानन्दचित्तारविन्दम्॥64॥

गद्यम् - इत्थं समुद्रगर्भनिर्भेदेऽशनिपातसम्पाते मनोधृतिसमाकर्षिण्यकाण्ड काण्डप्रकाण्डीवर्षिणि जञ्झापुञ्जीभवञ्जीमूतजाते उदन्वति कृतोत्पाते तदुद्धृतिद्रुतविधूता प्रचोदकस्य अवशङ्गता अपमार्गमुपगता नौका पूर्वाभिमुखा प्रयाणीकृत्य वायुवशाद्गोदावरीसङ्गमस्थानमुपविश्य तत्रैकं गर्भग्रावकोण मास्फाल्य सकलं शकलीबभूव तस्मिन्नन्तरे सत्वरं विजयानन्दो नौकाया उत्प्लुत्य प्लुत्वा सरित्पतिं यथाकथञ्चित्तीरभूमिमारुरोह ॥65॥

तत्र प्रतीपवटवञ्जुलमञ्जुकुञ्जे
पुञ्जी भवत्कुसुममञ्जरिकानिकाये ।
गन्धेन गन्धवहकल्पितबान्धवेन
विश्रम्य वन्यफलभुक्प्रययावरण्ये ॥66॥

एवं प्रयास्य बहुदूरमनेकमासा आसाद्य काननमधूनि सरस्सु चापः ।
चापद्वितीय इभगण्डकपुण्डरीकाद्युत्पातजातमपनीय पुरस्सरस्सन् ॥67॥

एष एवमटवीमटन् ययौ भीमवास्तुमथ दक्षवाटिकाम् ।
यत्र जन्तुजनितापवारिणी वारिणा सरति गौतमीधुनी ॥68॥

यत्राऽपि चाम्बुनि जना विनिमज्ज्य भक्त्या
सोमेश्वरं भवमनश्वरमर्चयन्तः ।
लप्स्यन्ति शाश्वतपदं बहुदेवसेव्यं
भाग्यादपश्यदपि कोटिफलीं च पल्लीम् ॥69॥

गद्यम् - अथ च, ॥70॥

In Public domain. Digitization Muthulakshmi Research Academy

नद्यां निमज्ज्य परिपूज्य च सोमदेवं भीमेशमद्भिरभिषिच्य विमुच्य बन्धैः ।
तत्रत्यपाशुपतयोगिनमेकमेत्य तस्याश्रमेऽवसदसौ विहितातिथेयः ॥71॥

गद्यम् - ततस्तत्र गतासु द्वित्रासु घटिकासु, दिनश्रीकरेण पश्चिमाशा-सागरस्नानवेलावेलानिक्षिप्तं पिण्डितकाषायवास इव; प्रतीचीहरिच्छबरसीमन्ति-नीकान्त कुन्तलस्थलीवलितललितशोणरुचिनिचयरञ्जितगुञ्जामञ्जरीव चरम-गिरिशेखरशिखरविपिनलतावलम्बीकालकपिसामिखादितः कालिङ्गीफलखण्ड-मण्डल इव हिंगुलविभङ्ग इव क्रमेण तमस्समूहकरम्बितं दिवसकरबिम्ब-मम्बराञ्जले ललम्बे । तदानीं तु,॥72॥

सन्ध्यातपारुणितपावनवारिणा सा
गोदावरी वरझरी परितो बभासे ।
काषायिणीं तदुपकण्ठवनीकुटीरे
स्थात्रीं महानुमतिमीक्ष्य विडम्बिनीव ॥73॥

गद्यम् - एवमाश्रमे निवसन् स विजयानन्दः पृष्टः पाशुपतयोगिना निवेदित निजवृत्तान्तस्तेनैवमफाणि । "अयि महोदय! अस्मिन्नस्मदाश्रमसकाशे भीकाराननो नाम रजनीचरस्सञ्चरति! । यद्यत्र स्थीयते भवता रात्रौ महान् प्रमादस्तेन समापतिष्यत् । तदत्र भवता न स्थातव्यम्। किन्तु अस्माक मस्याश्रमपदस्यानतिदूर एवाऽस्ति महानुमतिनामवत्या युवतेस्तापस्या आश्रमम्; अश्रमे तत्र भवता यापनीयोऽयं यामिनीसमयः" इत्युक्त्वा कृतानुमतिं तमादाय, महानुमतेराश्रमं रयेणायासीत् । सा पश्यन्त्येव पाशुपतयतिं महानुमतिः कुवलयावल्या सख्या सह प्रत्युत्थाय पादयोर्निपत्य सप्रश्रयमाश्रमं प्रावेशयत् । अथ यथार्हं तमभ्यर्च्य घटिताञ्जलिपुटा तन्निकटकटतटेऽतिष्ठत् ।

 In Public domain. Digitization Muthulakshmi Research Academy

संयमी च, सखीसमेतां महानुमतिमिष्टार्थसिद्धिसूचकैर्वचनैराशास्य, परिचाय्य च विजयानन्दं; तां तस्य सत्करणे नियुज्य निजाश्रमं निर्जगाम ।74॥

महानुमत्या स तदा तदाश्रमे कृतादरस्तां रजनीमनीनयत् ।
मृगेण तस्या अभिमानसूनुना कटे स्वपन् तन्निकटेऽनुशायिना ॥75॥

उषस्युपेताभिरुपान्तवाटिकामधुव्रतीभिर्मृदु बोधितो रवैः ।
तपस्तपन्तीमभिवन्द्य तापसीं समीपगोदामवगाहितुं ययौ ॥76॥

गद्यम् - तत्र कृतस्नानार्घ्यादिविधिः पुनः प्रतिनिवृत्याश्रामालिन्दे विजयानन्दस्सुखोपविष्टस्सन् तपश्चर्यया उत्थाय, अग्रे पद्मासनोपविष्टां कुवलयावलीसखीसमेतां महानुमतिं वीक्ष्य,! अम्ब यदि क्षमिष्यते भवती किञ्चिदहं प्रष्टुमुत्सहे! कुत इदं कुब्जाकदलकोमलं बाल्ययौवनदशामध्य मध्यासीनं वपुस्तव तपोनैष्ठुर्यविशीर्यमाणमाकलयसि? कमन्वयसुधाराशिं ते जनिश्रीस्सन्तानसाकल्यसाफल्यमनीनयत्! काभ्यामक्षरमुक्ताफलदामभ्यां नामनी तव पितृपादयोरलंक्रियेते ? केयमार्या तव सखी! जननि! अपरिचय कौतूहलसञ्जातचापल्यादेतत्सर्वमवगन्तुमुत्सहे! इति सविनीतिप्रणतिरप्राक्षीत् । श्रुत्वा च सा महानुमतिः किञ्चिदंकुरदव्याजस्मितकिरणरुचिरचितमुखमण्डला इत्थमवादीत्, "अयि! महोदय! यदि त्वमवजिगमिषुर्मम वृत्तान्तं सान्तमाख्यायते, श्रूयतां तावत्। इति वक्तुमारेभे ॥77॥

आसीत्सुमेरुगिरिदक्षिणसानुदेशे
शोभातिरिक्तसुरनाथपुरीविलासा ।
उद्यानहृद्यकमलां सरसां दधाना
विद्याधरेन्द्रनगरी सुलसाऽभिधाना ॥78॥

In Public domain. Digitization Muthulakshmi Research Academy

तस्यां बभूव नृपतिः पुरि हंसनामा
पद्मेति तस्य महिषी महितात्मकासीत् ।
जाते तयोर्गुणवतोस्तनये वसन्त-
श्रीरित्यनन्यरुचिराऽपि च शारदश्रीः ॥79॥

ते बाल्य एव निजजातिकृतानुबन्ध-
गान्धर्वनिर्वहणधूर्वदशक्तिमत्यौ ।
वाणीं विजित्य वरवैणिकचारुवाद्ये
वेणौ क्रमादभवतां जितबालकृष्णे ॥80॥

एकदा ते उभे सायं बाले लीलावनाद्बहिः ।
बालेन्दुमौलिसेवायै ययुतुर्देवमन्दिरम् ॥81॥

गद्यम् - तत्र भगवन्तं पशुपतिं भक्तियुक्त्याऽभ्यर्चयन्त्यौ वीणां गृहीत्वा वनन्तश्रीः स्थाणुं स्थाणूंश्च पल्लवयन्ती, वेणुमादाय शारदश्रीश्शिलाद्रव-मुत्पादयन्ती गायन्त्यौ देवं सिषेव ते । तदानीं तु, ॥82॥

वंशं दधत्यधरसीमनि शारदश्रीर्गत्वा चकार भगिनी रचितानुवादा ।
चैतन्यवज्जडमचेतनवत्सचेतो वंशानुगा खलु कला महिमानमेति ॥83॥

गद्यम् - एवं कञ्चित्समयं नीत्वा तत्र प्रतिनिवृत्ते ते बालिके मध्येमार्गं शुण्डादण्डमुत्सार्यझलझलत्पदकिङ्किणीनिक्वणानुगुणं भूरिकायोपरिचल-च्छिरसा शिलोलूखलगर्तवर्तुलावर्तमानशिलापिण्डं विडम्बमानं, लम्बमान-महोदरमध्यकण्डूतिं करौ सुदीर्घं प्रसार्य कषन्तं, परिभ्रमणरयान्निवृत्य पश्चार्धमुपगतायाः परिस्पन्दिबन्धुरनितम्बबिम्बोपरि लम्बमानायाः प्रालम्ब नायकमणेः प्रचण्डताण्डवं प्रदर्शयन्तं, नटन्तं वटुं, बालं गणाध्यक्षमद्राक्षिष्टाम् । दृष्ट्वा तं तुन्दिलं गिरिनन्दिनीप्रियाग्रनन्दनं किञ्चिद्विवृतवदनलक्षितदशनांकुरा,

In Public domain. Digitization Muthulakshmi Research Academy

शारदश्रीरधरप्रसारित स्मितबालचन्द्रिकाकिरणमण्डलासाक्षेपवीक्षणाज्येष्ठ सोदरीं वसन्तश्रीं व्यलोकिष्ट। ॥84॥

तामीक्ष्य वसन्तश्रीर्नासाग्रनिबद्धतर्जनी चख्यौ ।
मा तावदये कुर्यादेवं गणदेवमीक्ष्य परिहासम् ॥85॥

इति बृवन्त्यां द्रुतमेव तस्यां अतिकृधा निष्ठुरदृष्टिरागः ।
स नागवक्रः पथि तां शशाप त्वं नीचयोनिप्रभवा भवेति ॥86॥

गद्यम् - श्रुत्वा तानि शापाक्षराणि विदीर्णहृदया भयकम्पतया व्यत्यस्तीभवत्पदस्या वसन्तश्रीर्गणनाथपादयोर्निपत्य, "क्षम्यतां भवता देव! मृदुभाव, गणनाथ, करुणासनाथ, बाल्यचापल्यात्त्वयि कृतापराधा मम कनिष्ठसोदरी" इति सकरुणं विपलन्ती भयप्रकम्पितां शारदश्रीं तत्पादयोरपातयत्। सोऽपि हिमगिरिनन्दिनीनन्दनः करुणारसद्रवीभूत मानसस्सन्, "अये तवेयं सोदरी पद्माभिधाना दिव्यमानुषी भूत्वा मर्त्यलोके सिंहलराजं परिणीय कालान्तरे यथापूर्वं दिव्यत्वमाप्स्यति; भवती तु मनोभिवाञ्चितं, वररूपं वरं परिणेष्यति," इति वरं दत्वाऽन्तरधात् । तत्क्षण एव शारदश्रीर्दिव्यमानुषीरूपमुपपद्य रंहसा सिंहलमयासीत् । वसन्तश्रीरश्रुस्त्रावरेखा मलिनगण्डफलका एकाकिनी पितृपादावुपगम्य विशदीकृतशारदश्रीवृत्तान्ता दीर्घमरोदीत्।

चिन्तितौ च तौ पद्माहंसौ तामाश्वास्य तस्याः पुनरागमनं विधौ निधाय भगवन्तमर्चयत स्म ।

ततो गतवति कियति चित्काले विहरणाय निजवसन्तोद्यानं गता तत्र वासन्तीगृहे वसन्ती वसन्तश्रीर्वनसमीपमन्तरिक्षे विमाने व्रजन्तं कुबेरकुमारं नलकूबरमपश्यत् । दृष्टमात्रेणैव सा तस्मिंस्तस्यां स च सितकिरण

In Public domain. Digitization Muthulakshmi Research Academy

किरणानुषङ्गादिन्दुशिलेव पूर्णिमारजनीमुखवेलया चन्द्रमण्डल इवान्योन्यं द्रवीभूतरागरञ्जितान्तरौ बभूवतुः। त्रुटिमात्रेणैव विमाने प्रयाते जातमनोजात व्यथा वसन्तश्री राजभवनमव्राजीत्। क्रमेण तां विरहतापक्लिन्नां नलकूबरासक्ता मिव सखीभिर्विदित्वा पद्महंसौ धनददम्पती मिलित्वा तदङ्गीकारमेत्य वसन्तश्रीं नलकूबरेणोद्वाहयाञ्चक्रतुः ॥87॥

उपयम्य वसन्तश्रीर्नलकूबर मुदितरागरसरम्या।
पुष्पितसुफलितकाम्या सहकारेणान्वभून्महामोदम्॥88॥

गद्यम् - एवं सुखेन तयोर्दिव्यपुण्यदम्पत्योः धर्मानुगुणगार्हस्थ्यं निर्वर्तयन्त्योस्तयोरहं महानुमतिरिति सुता मन्दभागिनी सञ्जाता। महाभाग! अयं मे जननवृत्तान्तः। इतः परं श्रूयतामस्या मम सख्याः कुवलयावल्या उदन्तः ॥89॥

अस्ति पुरा विपुलाशनामा भूमीश्वस्सुगुणधामा।
शमदमगुणसम्पन्नः क्षमां स शासन् हठाद्विरक्तिं गतः ॥90॥

गद्यम् - मनस्येवममंस्त- "अमी दारा कश्मलनिस्सारसंसारधाराः; सम्पदस्तु भयसन्तापदाः; निलया एवैते मणीमयनिलयाः; निजैश्वर्यदुरास्वादनकलायां कबन्धाः एव बन्धवः; किन्तु शाश्वतब्रह्मानन्दपदं भगवत्पदमेव" इति निश्चित्य शीघ्रमेव प्राज्यं साम्राज्यमुज्झित्वा निर्ममतानिर्मलवैराग्यमहिमाहिमालयं गत्वा तत्र सुचिरं तपस्तपति स्म ॥91॥

श्रुत्वा मरुत्वानथ तत्प्रवृत्तिं विघ्नाय रम्भां सुकलानिगुम्भाम्।
रयं स तत्र प्रजिघाय जिष्णोरयं खलु प्रायिक एव भावः ॥92॥

विभ्रमनटनारम्भा रम्भा रम्भोरुरेत्य हिमशैलम्।
राजर्षिपुरोगा सद्वीणातन्त्रीव कलितचैतन्या ॥93॥

 In Public domain. Digitization Muthulakshmi Research Academy

रम्भालीलास्पर्शनमुपेत्य स प्रशमगततपस्तैक्ष्ण्यः ।
तच्छेवीं क्रमशोऽभूत् कान्तैव हि मोक्षपथिककान्तारः ॥94॥

गद्यम् - एवं रम्भासक्तचेतास्स राजर्षिस्तया रममाणस्तस्यामेनां कुवलयावलीमजीजनत् । प्रसवानन्तर एव सा देवकान्ता तं तापसं क्षीणतपसं विदित्वा, शिशुदारिकामिमां तत्पादसन्निधावेव विहाय देवनगरमगात् ॥95॥

तनयां प्रतिपालयन् स राट् पुनरारब्ध दृढं यमी तपः ।
अथ तत्परिवर्धितौषधी विधुनेवेयमवाप यौवनम् ॥96॥

सा कदाचिदियमाश्रमाद्बहिः केकिकोकिलकलालये वने ।
मोदते स्म रुतिगीतिकास्स्वयं पर्यवेक्षितुमिव द्रुमे दुमे॥97॥

लतिकानवडोलिकानिषण्णा भ्रमरीतिभ्रमरीतिरम्यगीतैः ।
व्यतनिष्ट मुदा तदा विनोदानथ सायंसमये कलामयेऽसौ ॥98॥

आश्रमं प्रतिनिवृत्य तत्पथे विश्रमाय सुमकुञ्जवासिनम् ।
भासमानमसमानतेजसा लक्षितं युवकमेकमैक्षत ॥99॥

गद्यम् - स चित्राङ्गदनामा गन्धर्वकुमारः कुमारी रमेव मनोरमां तापसकुमारीं तां वीक्ष्याऽन्योन्यलग्नमानसौ तौ तस्यामेव शरद्रजन्यां बालचन्द्रिकोल्लोच सम्भाविते, स्फुरत्कोरकमौक्तिकजालके, सुममङ्गलरङ्गवल्ल्यलंकृतान्तरङ्गे, लताकुडुङ्गवेदिकासङ्गतमहीजस्तम्भसम्भृतवनावनीरङ्गे सकलवनस्पतिसाक्षिकं विवाहं गान्धर्वमकुर्वाताम् ॥100॥

एवं परिणीतयोस्तयोराप्रथमयामान्तं, यामिन्यां तस्यां निरीक्ष्य नन्दिनीपुनरनागमनमाशंक्य, स राजर्षिस्तामन्विष्यंस्तत्र रयेणायासीत्। आगत्य विदित्वा तयोर्वर्तनं भिया कम्पमानं चित्राङ्गदं वीक्ष्य 'रे!रे! पापिन्! मम

In Public domain. Digitization Muthulakshmi Research Academy

सुतायां त्वया कृतस्यापराधस्य सदृशं फलं अनुभोक्तुं नक्तञ्चरो भ"वेति तीव्रं शशाप । ततस्तेन बहुधा प्रार्थ्यमानो "येन केनचिन्महापुरुषेण निहतो निजरूपं प्राप्स्यसी"त्युवाच । ततः ॥101॥

चित्रामङ्गम्य विकृतिं चित्राङ्गद उपागतः ।
भीकराननना‍म्ना स प्रययौ राक्षसो भवन् ॥102॥

गद्यम् - तस्मिन् राक्षसे भीकरानने दक्षिणापथाऽभिमुखङ्गते, विपुलाशयस्तनया मादायाश्रममुपाविशत् । तस्यां रजन्यामियं मे सखी कुवलयावली वियोगतापशुष्कतनूवल्लरी, तस्मिन्नाश्रमारामे न विरामदुःखदोदूयमाना चरन्त्येकाकिनी, स्मरन्ती मनोवल्लभं, रुदन्ती, निकुञ्जपुञ्जे लुठन्ती चिरं मनोभवव्यथामनुभवति स्म । ततः क्रमेण रामाविरहसन्दीपनकर किरण कन्दलारामोऽपि चन्द्रमास्तस्याः वियोगवेदनालोकनाक्षम इव क्षणादपरगिरि श्रृङ्गगुहागह्वरेष्वन्तर्हितो बभूव। लतांतलताललना अपि हिमशीकरस्राव मिषेणऽश्रुबिन्दुसन्दोहनिष्यन्दिन्यो बभूवुः। कृकवाकु काकमुखसकलशकुन्त सन्ततयश्च पक्षविधूननव्याजेन हृदयानि ताडयन्त्यः कलकलस्वनेन तया सह विलपन्त्य इवाऽऽसन् । एवञ्जाते तस्मिन् प्रभाते, प्रभूतप्रियवियोगतमोमयहृदया कुवलयावली कुवलयावल्या इव स्वजीवनस्य जीवनमेव शरण्यमिति मत्वा तत्र एकस्मिन् सरसि सहसा साहसेन पपात ॥103॥

तां वीक्ष्य तनयां रम्भा गृहीत्वा नाकमुद्ययौ ।
कुलायपतितां नीरे शुकी शिशुमिव स्वकाम् ॥104॥

वरालका सा तनयां गृहीत्वा, गत्वालकामात्ममनः प्रियस्य ।
हित्वा निकाय्ये नलकूबरस्य प्रायाद्रयान्नाकपुरीं स्वकीयाम् ॥105॥

 In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् - तत्रास्माकं, पितृपादस्य नलकूबरस्य भवने अहं चेयं कुवलयावली मम सखी च महता सख्येन व्यवर्धिवहि । एवंगते कस्मिंश्चित्काले आवां बाले लीलासौधोपरि वीथीषु विहरन्त्यौ, मिथस्समालोच्य मलयमहीधरपटीर कान्तारेषु, मन्दसमीरवलयनरम्यान्तरेषु सुमलताडोलाकेली विनोदमेदुरे मनस्या दधाने विमाने, तस्माद्विमानादेव प्रायासिष्व ॥ 106 ॥

क्षणेन गङ्गां यमुनां च रेवां विलंध्य विन्ध्याचलपादतल्पम् ।
व्युत्क्रम्य च प्रस्फुटसप्तयष्टिं गोदावरीमान्ध्रमहीललन्तीम् ॥ 107 ॥

क्रमशो मलयमहीध्रं वलमानमनोज्ञमन्दपवमानम् ।
सजवं प्राप्य विमानादवातराव प्रियेण तत्राऽऽवाम् ॥ 108 ॥

अवतीर्य तत्समीपे केरलनगरीं सुनारिकेलयुताम् ।
दृष्टा तद्भवनान्यपि सुरभिलपवनानि नवनवोपवनानि ॥ 109 ॥

गद्यम् - एवमावां परिणतरमणीयशोभालकाभां पुरस्य शोभां विलोकयन्त्यौ सत्यौ, ॥ 110 ॥

परिभ्रमन्त्यौ परितः पुरीं च तां पुरोऽवनेस्तव शनैः पुरस्सरे ।
परीतजातिप्रमुखप्रसूनकां वनीमपश्याव परीमलावनीम् ॥ 111 ॥

गद्यम् - दृष्ट्वा च, ॥ 112 ॥

निखिलागमशाखिकालसत्सुमनोभासि, बहुद्विजाञ्चितम् ।
नवमाधुकरप्रपोष्युभे वनमासाद्य वराग्रहारवत् ॥ 113 ॥

गद्यम् - तत्र प्रविश्य च, ॥ 114 ॥

लवलीलतिकाग्रडोलिकाभवलीलामनुभूय तत्र काञ्चित् ।
अवलीलमतिप्रकर्षिहर्षे नवलीनं सरसं मनो दधत्यौ ॥ 115 ॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् - ततो मधुमासवासितमाधवीलतावितानसन्ततसंवलयन-मलयानिले, मधुरमधुवृक्षमण्टपमञ्जुनिकुञ्जान्तरतले निषण्णमेकं युवकं अदर्शाव। ततो मत्सखी परिप्रश्नादिना विज्ञातनामानं तं माधवानिलं केरलावनीपतिनन्दनं वीक्ष्याहं मां वीक्ष्य स चापि, ॥116॥

दर्शनमात्रादुपगतदर्पकबाणावलीव्यथाविष्टौ ।
दृग्भ्यामेवालिंग्य च परस्परं रागरञ्जितैकहृदा ॥117॥

गद्यम् - तत्र कतिचिदेव क्षणानि स्थित्वा तं विहायाभ्रयानेऽस्मदलका-पुरीं अहं मत्सखो च पुनरयासिष्व, ततश्च,॥118॥

तस्य वदनेन्दुकान्तिं कान्ततरं तद्वचोमृतं स्वादु ।
धीरां तदाकृतिश्रीं मनसि बहु विचिन्तयन्त्यहमभूवम् ॥119॥

गद्यम् - तदा प्रभृति च, ॥120॥

नायासिषमुद्यानं नाक्रीडं मम सखीभिरीषदपि ।
नास्वापं रात्रिष्वपि सम्पूर्णं तद्गतैकदृढचित्ता ॥121॥

गद्यम् - अपिच,॥122॥

अनिशं दिवसा याता अनिशा इव मम निशास्वनिद्रातः ।
क्रमशस्सर्वावस्था विरहावस्थानतापरीताश्च ॥123॥

गद्यम् - ईदृशीं विप्रयोगिनीं मां ज्ञात्वा सखी कुवलयावलीयं मामाश्वास्य "दृष्ट्वा तत्र मनोविभुं माधवानिलं तदाशयं च विदित्वा सत्वरमेवायास्यामी" ति मामुक्त्वा मुक्त्वा च मामकीननगरं केरलनगरीं गता। अहं च मद्भवने स्थित्वा मदाशय"श्शलाठुर्वा, फलं वा भविष्यती" ति चिन्तयन्ती तां निरीक्ष्यन्ती स्थिता। ततः कतिपयैरेव दिवसैः सेयं पुनरागत्य "माधवानिलो

 In Public domain. Digitization Muthulakshmi Research Academy

येन केनापि राक्षसेनापहृतो न दृष्टचरो बभूवेति तत्रत्य जनैरहमश्रृणवं" इत्यकथयत, ॥124॥

हठाद्वचस्येवमुपागते श्रुतिं लुठन्त्युदीर्णं भुवि बह्वरोदिषम्।
तदाप्रभृत्येत्र वनीमिमां गता वियोगिनी चास्मि वराय योगिनी ॥125॥

गद्यम् - मम सदृशदशा चेयं सखी कुवलयावली मया सह समागत्य पत्ये मत्समव्रताऽत्रैव तिष्ठति महोदय! किं वच्मि, मन्दभागिन्यावावां प्रतीतः परं" इत्युक्त्वा सा महानुमतिः, ॥126॥

अश्रुबिन्दून्विमुञ्चन्ती सा दृष्टा दुःखभाजिनी ।
अतिमुक्तलता म्लाना मुकुलानिव मुञ्चती ॥127॥

एतस्मिन्नन्तरे तत्र कयाचित्कन्यया सः ।
सखीसङ्गतयाऽऽगत्य स पाशुपतयोगिराट् ॥128॥

गद्यम् - अनुगतकन्यापरिजने तस्मिन्महामुनावाश्रमोटजाभिमुखं समागच्छति, मुनिवरं तं वीक्ष्य कुवलयावलीमतिमहानुमतिर्विजयानन्दश्च सप्रश्रयप्रणाम-मभिमुखं गत्वा तस्य पादयोर्निपत्य दत्ताघ्र्यपाद्यादिविधय स्तमुटजद्वारमानीय समुचितासने उपवेशयित्वा नूत्नकन्यापरिजनसमेतं ते निकटकटतटोपरि निषण्णा बभूवुः। ततः पाशुपतयोगी च सन्तुष्टमना एवमवोचत् "अये वत्से! महानुमते! संरक्ष्यतामियं लीलावती सिंहलराजपुत्री सखीसमेता भवत्या यावदत्राहं पुनरागमिष्यामि" इति। श्रुत्वा चैतद्विषयं महानुमतिराश्चर्यचकिता सन्तोषानुसलिलस्यन्दिलोचनेन्दीवरा तां परिष्वज्य "अये मातृव्यपुत्रि! लीलावति कथं त्वमेनं भगवन्तं पाशुपतयोगिनमुपागतासि" इत्यपृच्छत् । सा चैवमफाणीत्, ॥129॥

इत एव कतिपयेभ्यः पूर्वं दिवसेभ्य आगता सायम् ।

मज्जनकपुरस्याग्रे मज्जनकेल्यै सखीभिरहमुदधिम् ॥130॥

स्नात्वा समुद्रसलिले ससखीजनौघं
सञ्जात कौतुकमना उडुपे विहर्तुम् ।
ताभिस्तदा समधिगम्य घनोडुपान्त-
स्तत्रान्वभूवमहमम्बुविहारयात्राम् ॥131॥

गद्यम् - तस्मिन्नेवान्तरे यत्रकुत्रचिद्वा हठात्समागतेन जञ्झामारुतेनेरितं तदुडुपं वेगान्निकटाटवीतटविटपिपटलान्धकारबन्धुरां काञ्चित्समुद्रवेलामनायि । तत्र वयं भयविह्वलचेतसरशनैर्जानुदघ्नसलिलेऽवतीर्य वेलामुपगतास्सत्यः अतिष्ठाव। तत्समये फलकुसुमसमिदाहरणायागत्यायं महात्मा पाशुपतयोगिचन्द्रो मां वीक्ष्य करुणया 'अम्ब! मा भैषीः सहसखीभिस्त्वामहं रक्षामी'त्युक्त्वा अस्मानश्रम माश्रममानीय फलभोजनादिना सन्तर्प्यैवं त्वदाश्रमं शनैरनीनयत्" इत्यवोचत् । ततः पाशुपतयोगीश्वरोऽतः पूर्वमेव विजयानन्देन विदितहाललीलावती मनोभावतया विजयानन्दवृत्तान्तं लीलावत्यै कथयित्वा तमेवमवादीत् ॥ वत्स! विजयानन्द! त्वमद्यैव प्रतिष्ठानं प्रति गत्वा मदाज्ञेति हालनृपति सपरिवार मिहानय" इत्युक्तवति तस्मिन्योगिशेखरे महाप्रसाद इति तदाज्ञां शिरसि धृत्वा विजयानन्दः क्रमेण पाशुपतलीलावतीमहानुमतिकुवलयावलीभ्यः प्रणम्य प्रतिष्ठाननगरीं रयादयासीत् । तत्र च, ॥132॥

पाण्डयेन्द्रदत्तनवमौक्तिकहारवल्यः फुल्लाम्बुजातनयना अपि चोलदत्ताः ।
मन्त्री स पोट्टिस इयाय नृपं पटीरान् लब्ध्वा च केरलपतेरिव कीर्तिमूर्तीन् 133॥

गद्यम् - एवं हालसार्वभौमसामन्तसन्तानसमर्पितमुपहारसहितं करगतं करशतं तस्मै समर्प्य करौ मुकुलीकृत्य स्वस्य विजयानन्देन साकं प्रतिष्ठान

 In Public domain. Digitization Muthulakshmi Research Academy

नगरात्प्रस्थानमारभ्य पुनरागमनपर्यन्तं सर्वं वृत्तान्तं कथयित्वा नौकायां समुद्रे सिंहलं प्रति यातस्य विजयानन्दस्य स्वेन चिरनिरीक्षितस्याप्यनागमनं कथयति पोट्टिसमन्त्रिणि, तस्मिन्नेव समये विजयानन्दो राजसभामासाद्य स्ववृत्तान्तं सान्तं भगवत पाशुपतयोगिनश्चादेशं सर्वं सार्वभौमाय न्यवेदयत् ॥134॥

ततस्स हालावनिपालशेखरः खरोस्त्ररत्नादिकरं यशस्करम् ।
समाददन् मन्त्रिहितादिभिर्वदन् निदेशिकां पाशुपतस्य योगिनः ॥135॥

शुभे मुहूर्ते त्रिभुरेष मन्त्रिभिः पुरोधसा बन्धुपुरस्सरं पुरात् ।
अनेक सेनापतिभागनीकिनीयुतः प्रतस्थे यतिनायकाश्रमम् ॥136॥

गद्यम् - स क्रमेण पुरं विहाय विहायसचुम्बिध्वनिदन्तुरसेनानिरन्तर दिक्चक्रवालान्तरश्शुभनिमित्तोदात्तः पट्टणपक्कणनदीवनशतमतिक्रम्य कतिपयै र्वासरैर्यत्र गोदावरीजननी स्वशाखाहस्तसप्तकेन केनापि दुर्भिक्षेणेतिबाधाभिश्च प्रविष्टुमनवकाशदायिना प्रोह्यमाणां, तृणकाष्टजलफलसस्य समृद्धबहुमहापण्डित मण्डलीबहुकल्पान्तामण्डितनगरी जनवनग्रामपल्लीमतल्लीसमुल्लसनमेदुरां सकलकलासमेधिनीं मेदिनीमासाद्य भक्तजनकल्पककल्पस्य बहुकल्पान्ता - दुषितस्य सुरपुरन्ध्रीसमभ्यर्च्यमाणमाणिक्याम्बासमेतस्य दाक्षारामभीमेश्वरस्य देवालयसीम्नस्समीपवर्तिनीं हसत्कुसुमलताविताना वनीं फलशाखिकावृतावनीं वनीं न्यवीविशत् ॥137॥

निविश्य सेनां च निवेशयित्वा सुबन्धुरे तत्र वने सबन्धुः ।
हितैः परीवारसमाहितस्सन् स एष सायं विधिवद् व्यनैषीत् ॥138॥

गद्यम् - ततः कृताभ्यवहारस्स हालधरावरस्समित्रवारस्सन् तस्याः रजन्या प्रथमयामे स्वस्य पटकुटीरस्य शतव्योमदूरे स्थिते गुञ्जालतामञ्जरीपुञ्जिते कस्मिंश्चिन्निकुञ्जद्वारे स्थितमेकं युवानमपश्यत् । दृष्ट्वा च तं, "अयि भोः

कस्त्वमत्रैकाकी विचरस्येवमरण्यानी विभागे' इति पृष्ठस्स युवाऽवनीपति मेवमवादीत् । 'अयि राजन् ! श्रूयतां मम वृत्तान्तः" केरलनगराधिनाथस्य माधवानिलनामाऽहं कुमारः ॥139॥

एकदाहं चरन् हृद्ये उद्याने नः पुरः पुरः ।
व्योमयाने समायाते गजयाने व्यलोकयम् ॥140॥

गद्यम् - ते नवयुवती विमानादवतीर्य अस्मद्वने इतस्ततो विचरन्त्यौ मां वीक्ष्य लतान्तरिते अभूताम् । ततः कञ्चित्समयं नीत्वा माधवीलता वेल्लितमधुवृक्ष मण्टपे स्थितं मां सुदूरेणैव पश्यन्त्यौ स्थिते । अहं च अस्मदुद्यानस्य पुरप्रवेशनायानधिकारमिषमादाय शान्ततया तत्समीपं गत्वा "सुभगे! कुतः प्रविष्टमस्मद्वनं भवतीभ्यां राजोचितं" इति पृष्टे ते स्ववृत्तान्तं कथयित्वा स्नेहेन विज्ञातमामकनामधेयादि क्षणं तत्र अवसताम् ॥ 141॥

वसन्त्यौ तौ वसन्तेध्दवासन्तीवामिते गृहे ।
भासयन्त्यौ स्वकैर्वाक्यैरशोभेतां स्वसौहृदम् ॥142॥

गद्यम् - तदाहं महानुमतिनाम्नीं तयोरेकां चन्द्ररेखाकृतिं गन्धर्वराजपुत्रीं दृष्ट्वा विमोहमगमं; सा च मयि तथैव दत्तचित्तानुरागाऽवर्तत ॥143॥

अदृश्येते क्षणेनैते अभूतां मीनलोचने ।
विमानं स्वं समारुह्य मेघोद्यद्विद्युताविव ॥144॥

गद्यम् - तदन्वहमन्वहं महानुमतिसंसक्तमतिरभ्यवहारादिषु नातिमात्रानुमति श्चिरं विरहेण पीड्यमानो राजगृह एव स्थित्वा परितापमाप्नुवन्नेकस्मिन् दिवसे सायंसमये पूर्वमुद्यानवनं गत्वा तत्रैकस्मिन् मन्दमन्दसरन्मरुदंकुरसरस्तीरसीम्नि तामेवान्तरे स्मरन् चिरं निषण्णो विषण्णहृदयः कथञ्चित्सरस्सलिल शीतलानिलांकुरकिरत्सुखमनुभवन् सुदुष्प्रापं सुखस्वापमगमम् । ततो मयि

 In Public domain. Digitization Muthulakshmi Research Academy

निद्राया उत्थाय नेत्रे उन्मीलयति, रात्रावस्मिन् वनेऽहमास । अपि चैको राक्षसो मां हन्तुमुद्युक्तो विवृतविकृतदंष्ट्राकशलाननो मत्पुरोऽवसच्च ॥145॥

ततोऽहं कोपवेगेन कृपाणं कटिसङ्गतम् ।
सहसाऽऽकृष्य हस्तेन तेन योध्दुं समुत्थितः ॥146॥

गद्यम् - एवमावामाचतुर्थयामं युद्धमकरवाव। यातुधानानां यामिनीसमायान्ते बलाभावतया सोऽन्तरधात् ॥147॥

अहं तु तत्रैव बलादहन्तया निहन्तुमेनं दनुजं वने वसन्।
महान्तमुग्रद्विषतं जघांसितः परेद्युरालोक्य तमागतं निशि ॥148॥

गद्यम् - पुनस्तेन मयि युध्यत्याचतुर्थयामं पुनस्सोऽन्तरभूदेव । एवमहं तं निहन्तुं वन्यफलाशीं तस्मै प्रतिदिनं निरीक्षे' इति तस्मिन् कथितवति "अयि भोः मा त्वर्यतां तावत् अहमद्य रात्रौ तं दृष्टासुरं संहरिष्यामी"त्युक्त्वा तं स्वमित्रमण्डलीं च दूरतः प्रेषयित्वा तदागमनस्थले तस्मै हालावनीपालो निरीक्षन् तस्थौ ॥149॥

तस्यां ततो निशि विशालभयङ्करास्यः
संविश्य तत्र बहुराक्षसदक्षयुक्तः ।
कोपेन दीपितमहारुणनेत्रयुग्म-
कोणस्स कोणप उवाच महीशचन्द्रम् ॥150॥

अपसर राजन्माकुरु कृपयाऽहं वच्मि निष्फलं यत्नम् ।
किमलातेन शिरस्ते कर्षसि वृथा वैरभावमेत्य मया ॥151॥

इति बृवन्तं प्रतिकक्षिराक्षसं निरीक्ष्य कोपाधिक रूक्षिताक्षः ।
जवं क्षमापद्मदलाक्षिपालो हालस्स्वकौक्षेयकमुत्क्षिपन्सः ॥152॥

पविघोरप्रहारं तद्रक्षोवक्षसि सन्दधौ ।
विवृत्य स मुखं राज्ञस्समुखं सहसाऽऽययौ ॥153॥

गद्यम् - एवमतिघोरे तयोर्युद्धे प्रवृत्ते, चतुर्थयामान्तरे रजनीकरे पश्चिमाशाशिखरे भास्वरे, हालप्रभुशेखरः करगतखरतरकरवालेनावलीलमव-लेपदोषदूषितं दोषाचरशिरश्चिच्छेद ॥154॥

ततो वपुष्यस्य निपातिते भुवि प्रपूर्णसौन्दर्यधरस्तु तत्तनोः ।
उपागरः कश्चिदमर्त्यपूरुषो नृपालपादानत एवमावदत् ॥155॥

गद्यम् - अयि नृपालशिरोमणे! चित्राङ्गदनामाहं गन्धर्वराजकुमार एकदा हिमगिरिप्रत्यन्तपर्वतान्तर्वने विहरन् तत्रैकस्मिन्नाश्रमे कुवलयावलीनाम्नीं कन्यां दृष्ट्वा, सा च मां वीक्ष्य चान्योन्यरागरारज्यमानमानसावस्मद्गन्धर्व-कुलोचितेन गान्धर्वविधिना विवाहमकुर्वहि । तदा मद्वृत्तं ज्ञातवता तस्या जनकेन केनचिद्राजर्षिणा कृद्धेन "राक्षसो भवे"ति शापमुपगतेन मया स राजर्षिर्बहुधा प्रार्थ्यमानः कृपाद्रवीभूतचेताः "केनचिन्महापुरुषेण विमोक्ष्यसे शापवशा"दिति कथितस्तक्षणमेव राक्षसरूपं गतस्सन्नस्मिन् भीमनायकदेवालयपरिसरारण्य सीम्नि वसन्नत्रैव अनतिदूरे मत्प्रियया कुवलयावल्या समेताया महानुमत्या आश्रममस्तीति ज्ञात्वा तदाश्रममगत्वैव संरक्षन्नेतदरण्यगतनरान् संहरन् पुण्येन फलितेन मुनिवाक्येन च पुण्यपुरुषेण भवताहमेवं प्राप्तवान् शापमोचनं इति तस्मिन् ब्रुवति सति दूरात्तत्कलकलमाकर्ण्य सरोजपरिवारं विजयानन्द स्तत्रागत्य राज्ञा विदितवृत्तान्तस्सन्नतः पूर्वमेव महानुमतिमुखाच्छ्रुत चित्राङ्गगदमाधवानिलचरिततया ताभ्यां तत्प्रिययोः स्थितं समग्रमुक्त्वा राज्ञे च निवेद्य सूर्योदयसमये सर्वे पाशुपतयतिनाथाश्रमं प्रति प्रतस्थिरे ॥156॥

 In Public domain. Digitization Muthulakshmi Research Academy

आश्रमभूमेर्दूरे सैन्यं विन्यस्स हालभूपालः।
मन्त्रिहितमाधवानिलचित्राङ्गदसङ्गतो यतिं द्रष्टुम् ॥157॥

गद्यम् - पादचारी प्रथमं परिसरसरसीतीरतुलसीदलपरिशीलितवर-शीतलवातलेशैरासादितस्वागतस्सत्क्रियमाणः, आननानुन्नम्य साश्चर्यदृष्टिभि-राश्रमबालकुरङ्गैरभिवीक्ष्यमाणः, प्रतिपालितकोटस्कुटीगताभिः कीरशारिकाभि 'रागच्छत, पादौ प्रक्षाल्य पानीयं पिबत, भोजनं कुरुते"ति प्रीतिपूर्वकं वक्ष्यमाण-स्तथैवाभ्यासवशात्तरुशाखाभ्योऽवतीर्य प्लवत्प्लवङ्गमैस्साष्टाङ्गं नमस्क्रियमाणो माणवकैः पाशुपतयोगिप्रेषितैः शिष्यसङ्घातैः कृतातिथेयो विधेयतया शनैराश्रमं गत्वा समित्रबान्धवं योगिनं प्रणम्य तन्निर्दिष्टोचितासने उपविश्य परिजनेष्वप्युचितासनेषु स्थितेषु मुनिना समात्ताशीर्वादः कञ्चित्समयं नीत्वा गृहीतविश्रान्तिस्तस्थौ । ततो मुनिना चित्राङ्गदमाधवानिलौ प्रति परिपृष्टस्तौ तस्मै विजयानन्दः परिचयाञ्चकार ॥158॥

तत एषमवादीत्स योगी पाशुपतो नृपम् ।
अवैमि भवतैवैष शापमुक्तो भवेदिति ॥159॥

तस्मादस्मद्भाविज्ञानादाकारितस्त्वमद्य मया ।
इति यतिराख्याय महानुमतिं समाधाय तत्तपोबलतः ॥160॥

गद्यम् - पद्माशीलमेघनलकूबरादीन् लीलावतीमहानुमत्यादेराप्तजनांस्तत्र मनोबलादेव जवादवातारयत् ॥161॥

आगतांस्तान्समादृत्य स्वागतं सन्दिशन् यती
सबहूकारमातिथ्यं स बहुप्रीतिमान् ददौ ॥162॥

गद्यम् - ततस्तेषु कृतातिथेयेषु प्रचलितां प्रवृत्तिं तैः सर्वैः कथयित्वा स्वेन साकं तांस्तान् सर्वानादाय ययौ च महानुमतेराश्रमम् ॥163॥

तत्र लीलावतीं पद्मावसन्तश्रीश्चिरेक्षणत् ।
महानुमतिमालिंग्य कोष्णबष्पाण्यमुञ्चताम् ॥164॥

गद्यम् - एवं पद्मावसन्तश्रियौ समधिगतविनये तनये परिष्वज्य हस्तस्रस्त माणिक्यशलाके पुनरवाप्त इव परितुष्यमाणे, उरस्फुरितगलितमालतीमालिके प्रमृग्यमाणे पादसंलग्न इव प्रणिपतन्त्यौ ते हस्तैरुत्थाप्य भर्तृभ्यां सह महानुमोदम् अनुभभूवतुः । तदनु च ते हालाय लीलावतीं माधवानिलाय महानुमतिं च दत्वा परिणयितुं यतिनाथेन समादिष्टे । तयोरनुमतिं तस्मै निवेदयाञ्चक्राते । तदा मुदा स यतिनाथस्तान् सर्वानादाय, ॥165॥

विचित्रडोलाह्वयचारुमण्टपे सचित्रवप्रस्थगितोपलद्विपे ।
स्वसप्तगोदावरपङ्कजाकरोत्किरत्तरङ्गानिलशीतशीकरे ॥166॥

समुच्छ्रये शिल्पकलासमुच्चये द्युकर्षणद्वारशिरश्चतुष्टये ।
उदग्रबोधिद्रुमपक्तमालतीगलत्सुमास्तीर्णमहामहीतले ॥167॥

पुरस्थलीनिर्मितनन्दिनन्दिते शिलामयोर्ध्वप्रविशालशालिके ।
मसारकल्पाश्मविकारकारिते सुसालभञ्जी रुचिपूरपूरिते ॥168॥

माणिक्याम्बासमेतस्य भीमनाथस्य मन्दिरे ।
सुन्दरे बन्धुरोद्यानगन्धसन्धायकेन्दिरे ॥169॥

कर्पूर चूर्णपरिकल्पितरङ्गवल्यां
कल्याणमण्टपसमुल्लसित क्षमायाम् ।
कल्याणवस्तुजलसम्भृतकुम्भशुम्भ-
द्रम्भाफलप्रसवमेदुरवेदिकायाम् ॥170॥

 In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् - पुरस्कृतपुरोहितं पुरोगतपरीवारबन्धुमिव सचिवबन्धुरं हैमवतीपशुपति समक्षं पाशुपतस्स्वसाक्षिकं हाललीलावत्योर्माधवानिलमहानुमत्योश्च विधि विहितं मङ्गलस्वनमहितं विवाहं महावैभवमकारयत् ॥171॥

शीलमेघस्स हालाय स्वराज्येऽर्धं विभज्य च ।
अदाच्च व्योमचाराद्या विद्या विद्याधरेन्द्रजः ॥172॥

गद्यम् - ततस्सर्वेऽपि संयमिनं साष्टाङ्गं प्रणम्य तदाशीर्वचनैस्साकमनुमतिमपि गृहीत्वा, ॥173॥

अलकां नलकूबरो ययौ कुलकान्तावनयावरान्वितः ।
कुवलावलिना प्रियादयादपि चित्राङ्गद आत्मपत्तनम् ॥174॥

गद्यम् - हालावनीपालोऽपि सलीलं लीलावत्या सपरिवारः स्वपचनं प्रतिष्ठानं गत्वा तत्र सुखेन निखिलभोगाभोगस्सन्नुवास । कवीशपोषकस्संश्च स च स्वय मपि **गाथासप्तशतिनामकामेकां** कृतिं प्राकृते सङ्कलितवान् । अपि च ॥175॥

अविहाय सदा धर्मं स महीवरमण्डनः ।
राज्यं कृत्वा रिपून् जित्वा यशोभिश्शुशुभे चिरम् ॥176॥

पञ्चाननवरवाहे पञ्चाननभासुरार्धदेहेऽम्ब! ।
पञ्चीकृतभूतात्मन् पञ्चमरत्नं समर्पितमिदं ते ॥177॥

इति श्रीमदुभयभाषासनाथ द्विभाषि सोमनाथकृतौ
राजरत्नमालायां पञ्चमं रत्नम् ।

****

In Public domain. Digitization Muthulakshmi Research Academy

षष्टं रत्नम्

श्री कामेश्वर्यै नमः।

द्विभाषि सोमनाथकृता श्री राजरत्नमालाचम्पूः

कामेश्वरीं विनास्थात् का मे दीर्घायुरधिकसुखदात्री ।
तामेवातो ध्यात्वा षष्ठं रत्नं समारभे स्त्रष्टुम् ॥1॥

गद्यम् - अथ - ॥2॥

तस्य हालस्य राज्यान्ते अध्युवास तदासनम् ।
सुतो **मन्दुलको** नाम यशस्तुन्दिलकान्तिधृत् ॥3॥

जनकेन समो हि पालने जनकेनापि समश्च तत्त्वतः ।
जनको यशसां च सम्पदा जनकल्पायितमूर्तिरेव सः ॥4॥

गद्यम् - स पितृवत्पञ्चसमा राज्यमुपलभ्य, ॥5॥

देव्यां देवसमो राजा भव्यस्सोऽजनयत्सुतम् ।
पुरीन्द्रसेननामानं सुरेन्द्रसदृशौजसम् ॥6॥

पूज्ये स राज्ये विधिवद्विधीतः पित्राऽर्हकाले पृथिवीप्रशास्त्रा ।
आदान्मनस्स्वाभिमुखं जनानां भानुर्यथा पुष्पमिवानुवर्ति ॥7॥

एवं तु पञ्चवर्षाणि साम्राज्यमुपभुज्य सः ।
वृत्तेन नाम्रा **सौम्या**य पुत्रायादान्महीतलम् ॥8॥

स चाऽपि पञ्चाब्दमितं महीतलं सचापहस्तेन वरेण सन्दधन् ।
समाप, सम्पूजितदिव्यभारतीरतिर्निंतान्तामतिलोकसन्नुतिम्॥9॥

 In Public domain. Digitization Muthulakshmi Research Academy

अजायतास्मान्मतिना सुतेज अजायितस्सर्वहितस्सुतस्सन्।
स सुन्दरस्सर्ववसुन्धराञ्चद्धुरन्धरस्सुन्दरशान्तकर्णी ॥10॥

गद्यम् - स साम्राडेकवत्सरं स्वराज्यं स्वाराज्यमिन्द्र इव विभवसान्द्रस्सन् अपालयत् ॥11॥

चकोरशान्तिकर्ण्याख्य उद्बभूव ततस्सुतः ।
सत्कवीन्द्रचकोराणां रश्मिदश्चन्द्रमस्समः ॥12॥

गद्यम् - स राजा शरदर्धसम्मितिप्रदीप्तप्राज्यराज्यरारज्यमाननिजमण्डलः कुण्डलीन्द्रो वैदुष्येण, दानेन दधीचिकल्पकल्पः, कल्पान्तकालकालप्रायो दुर्धियां, श्रिया च पद्माक्षसदृक्षस्सन् यशस्सितच्छदच्छविना परमराजत । ततश्च शिवस्वातिरिति कुमारो बभूव ॥13॥

त्यागाभोगतया यशस्यपि महाभागो भवान् राघवः
भाभास्वन्नयभावबन्धुरमतिर्लोकं समालोकयन् ।
श्लोकश्लोकितसत्कृतिश्च सुकृती स स्वीकृताञ्चत्कृति-
श्शोभातिप्लुतदिक्ततिर्वसुमतीं संरक्षति स्म स्वयम् ॥14॥

तस्यैषा वसुधा त्रिकालफलदा सौख्यास्पदा सर्वदा
कीर्तिस्फूर्तियुताः कलाश्च सकला विद्वत्वमुद्यत्पदम् ।
कष्टं नष्टमभूद्धो विघटितः कल्या च कल्याणता
साष्टाविंशतिवर्षसम्मिति **शिवस्वातौ** क्षितिं रक्षति ॥15॥

गद्यम् - तस्य भूवरस्य पट्टमहिष्यां **गौतमीपुत्र**नामा पुत्रोऽजायत । स कुमार-शेखरो वंशकरः करगृहीतमहासीमन्तिनीकरस्सामन्तोपात्तकरः करि-घटाघटित-मदपङ्किलप्राङ्गणरङ्गन्मधुकरकुलकलकलस्वनरूपस्तुति-निकरस्सन् विराजिते स्म। अपिच, - ॥16॥

In Public domain. Digitization Muthulakshmi Research Academy

भागीरथो रन्तिविभुर्भृगू रघुर्जिताभियातिश्च ययातिभूपतिः ।
प्रयत्नसिद्धौ धनदानवैभवे यशस्यसौ वंशकरैक कारणे ॥17॥

स एष गौतमीपुत्रः पुत्रोऽस्यासमभूतियुक् ।
समोऽभून्महसा धात्रा मान्धात्रा च प्रसिद्धितः ॥18॥

तुङ्गं त्रिलिंग्यमधिगम्य कुलानुषङ्गि
रङ्गत्सुवर्णरुचिसान्द्रमृगेन्द्रपीठम् ।
शौर्यश्रियुः प्रियतरं पृथुसौधकल्पं
वीर्याकरं निजकरं स रणेऽकरोच्च ॥19॥

स सार्वभौमः प्रशशास भूमिं विशालसीमां बहुमाविशालाम् ।
साकूतमासेतुहिमाचलान्तां साकेतनाथोपमबाहुवीर्यः ॥20॥

राजसूय मुखदिव्यमखानां वाजिमेधबहुयागवराणाम् ।
वाजपेयचयनेष्टिशतानां यायजूकमणिरास स एषः ॥21॥

गद्यम् - अपि च, -॥22॥

काश्मीरगजकटुशौर्यबलं निवार्य श्रीं मागधीं समनुभूय कलातिगन्धाम् ।
गौडस्य राज्यविभवस्य रसानुभूतिमासेव्य दिव्यविनुतिं स ततां प्रपेदे ॥23॥

रन्ध्रान्वेषिरिपून् नीरन्ध्रात्मबलाच्चकार निर्जित्य ।
आन्ध्रीं कीर्तिविभूषासान्द्रां निजमेदिनीपुरन्ध्रीं सः ॥24॥

आसीदासेतुशीताचलकलितलसत्सर्वसर्वंसहेश-
स्सान्द्रश्रीवैभवाभ्यां बुधजनतुलितोपेन्द्रदेवेन्द्रमूर्तिः ।
कीर्तिस्फूर्तिप्रपूर्तिप्रतिघटितसुधावर्णनीयार्णवेन्दु-
र्भूयान् श्रीशातकर्णिर्गुणमणिरभवद्गौतमा पुत्रनामा ॥25॥

 In Public domain. Digitization Muthulakshmi Research Academy

अवन्तिसीमन्तमनोज्ञमुक्ता कुरुक्षमाया नवहारवल्ली ।
विदर्भभूहीरवलग्नभूषा बभूव तस्य प्रथमानकीर्तिः ॥26॥

अफालनेत्रस्स तु राजमौलिस्त्वषण्मुखः शक्तिधरः कुमारः ।
प्रजापतिश्चाप्यचतुर्मुखोऽभूत्स गौतमीपुत्रमहामहीशः ॥27॥

नाम्नास्य सेनाऽऽस च वैजयन्ती सीम्नो दिशानामपि वैजयन्ती ।
तदार्जितासीदपि कीर्तिमाला शौर्याश्रयाकर्षितवैजयन्ती ॥28॥

गद्यम् - एवं विराजमानो राजराजो गौतमीपुतः, -॥29॥

स धान्यकटकं कृत्वा कृष्णवेणीतटे स्थितम् ।
राजधानीं निजान्भ्रोर्व्यां पालयन् लीलयैकदा ॥30॥

प्रसवोपवने निशि प्रिये मृदुमाधुर्य मिलत्परीमले ।
प्रसरन्नवसान्द्रचन्द्रिके सितचन्द्रोपलशालिकोपरि ॥31॥

निवसन्नवमञ्चके नवे स्त्रवदिन्दूपलधृद्वितानके ।
दरफुल्लनवीनमल्लिकासुमनस्तल्लजतल्पसीमनि ॥32॥

गद्यम् - तत्र प्रशान्तनिशायां निशान्ते विश्रान्तस्सन्, - ॥33॥

हयमेधमखं चिकीर्षितः पुनरप्येष हितं कृतं पुरा ।
स्वपुरे निखिलारिसूदनस्सपुरोधस्सचिवस्सबान्धवः ॥34॥

प्रयापयित्वा लघुयामिनीं च तां उषस्युपावर्तितदेवपूजनः ।
सभामभिप्राप्य विभासयन् दृशा विभासयन्नात्मजनान् सभाजयन् ॥35॥

पुरोधसामात्यजनानवेक्ष्य स स्वमानसान्तः प्रतिपन्नमाशयम् ।
समादिशंस्तत्तदुदीर्णसम्मतिं प्रमोदमादाय चमूपमैक्षत ॥36॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् - ततस्तद्दृष्टिपातान्तर्यमभिजानन्, -॥37॥

बभूवुः केतवो यस्या रिपूणां धूमकेतवः ।
धनूंष्यप्यरिदावाग्नेरासन्निन्द्रधनूंषि च ॥38॥

सेनां समीकृत्य स वैजयन्त्याश्शाखां बलैकामकरोदथैकाम् ।
चमूपतिस्सम्भृतदण्डनीतिर्युद्धाय सिद्धां समरप्रसिद्धम् ॥39॥

गद्यम् - ततश्च मौहूर्तिकविनिश्चितमुहूर्ते स सार्वभौमस्सर्वजनसमक्षं तु, ॥40॥

तुरङ्गमेधोचितमुत्तमं हयं कुरङ्गवेगप्रविलंघनत्वरम् ।
करम्बितं काञ्चनरत्नमण्डनैर्निटालहैमांचितपट्टिकाक्षरम् ॥41॥

पुच्छप्रभाराजिनिरस्तशेषं उच्चैश्श्रवस्स्वर्हयनिर्विशेषम् ।
विचित्रकौशेयनिबद्धवेषं प्लुतिक्रमोत्साहजधीरहेषम् ॥42॥

विसृज्य वाहिनीं पश्चादादाय च तया सह ।
प्रतस्थे गौतमीपुत्रो गोदावर्येव गौतमः ॥43॥

स्वेच्छासञ्चारतया गच्छन्ननुगच्छदन्ध्रविभुसैन्यः ।
पूर्णतटाग्रदेशं तूर्णं मुलकाह्वयं हयः प्राप ॥44॥

तं गौतमीपुत्रमायान्तं स्वसार्वभौमं सेवकैर्विदित्वा ।
चित्ररत्नोपायनसमेतस्सन् अभिमुखं प्रत्युत्थाय ॥45॥

तत्तटस्थो विभोस्साय्येप्यतटस्थो रणोत्सवे ।
आन्ध्रराजन्यसामन्तस्सेनयान्वगमद्विभुम्॥46॥

 In Public domain. Digitization Muthulakshmi Research Academy

गौतमीपुत्रभूकान्तस्स्वसामन्तस्य सेनया ।
प्रतिष्ठानपुरप्रान्तात् प्रतस्थेऽनुहयं ततः ॥47॥

मञ्जुलवञ्जुलगुञ्जाकुञ्जावलिरतस्वकूलायाः ।
मञ्जीराया नद्यास्तीरेऽश्मकदेशमुपययौ हयः ॥48॥

अश्मकमुत्पातयितुं प्रथमोद्गतयागहयतरङ्गानुगते ।
आन्ध्रमहासैन्याब्धौ स्ववाहिनीभिश्कास्समुपररुधुः ॥49॥

प्रबभूवोभयोर्मध्ये शकान्ध्रधरणीन्द्रयोः ।
वाहिनीयुतयोस्पर्धा विन्ध्यमेर्वोरिवागयोः ॥50॥

गद्यम् - सम्पराये तत्र सकलशकवाहिन्यां सान्द्रमहान्ध्रसार्वभौममार्ताण्डतेजः प्रसारेण प्रशमितायां सत्यां, - ॥51॥

शिरोभिरानतैस्सर्वे शकास्तं शरणं ययुः ।
ईश्वरीमूलमुद्वीक्ष्य दुष्टा इव महोरगाः ॥52॥

ततो गृहीत्वा बहुधा कराकृतिं पराघ्र्यरत्नादिमहार्थसम्पदम् ।
तुरङ्गमस्यानुपदं ययौ बलैस्स यूधनाथप्रबलैर्महाबलैः ॥53॥

गद्यम् - परिक्रमन् क्रमेण स तुरङ्गमोऽपि सौराष्ट्रनामदेशमाससाद ॥54॥

मुखरत्खुरसम्भवत्प्लुतिं मुखरङ्गन्नवपट्टिकं मखाश्वम् ।
मुखसीमनि तद्भुवोन्ध्राणमुखवीरांश्च निरीक्ष्य तत्र भूपः ॥55॥

वनानि दुर्विनीतानां यवनास्स्वचमूचयैः ।
तेजोवतान्ध्रनाथेन योद्धुमारेभिरे तदा ॥56॥

पतितानि भटैर्महान्ध्रजानेररिसैन्यानि विचूर्णिता रथालिः ।
असिभिन्नमदेभकुम्भमुक्ता जयपद्मोद्वहनाक्षताः कृताश्च ॥57॥

गद्यम् - तत्र निरवनयवनावनीकान्तेषु गौतमीपुत्र महीधवपादाक्रान्तेषु, तेष्वेकं यवनराजयुवकं स सौराष्ट्रदेशे स्वसामन्तमिव नियुज्य त्वरितं तुरङ्गममनुसरन् सपरिवारः पुरोऽगात् ।58॥

सरन्नरं स मखतुरङ्गमः क्रमात् "प्रभास" मित्यमलयशःप्रभासितम् ।
समीपभूवनतटसोमनाथयुक् समाप, संविदितसुतीर्थमुत्तमम् ॥59॥

तदनु गौतमिपुत्रमहीपतिस्सदनमैक्षत शैलसुतापतेः ।
सहजसुन्दरशिल्पकलाञ्चितं दिविजमूर्तिविराजिमहाजिरम् ॥60॥

स्वमानसाभैरभिषिच्य निर्मलैः सुशीतलैरम्बुभिरीश्वरं नवैः ।
स्वतेजसाऽऽनर्च समैश्च कुंकुमैस्सुवर्णगौरीपदपङ्कजद्वयम् ॥61॥

बहुरत्नविभूषणानि मुक्ताकटकादीनि समर्प्य शैलजायाः ।
गिरिशस्य च सोमनाथनाम्नस्तुरगेणैव पुरो ययौ पुनस्सः ॥62॥

अकरावन्तिनामानमाकरं सुश्रियां हयः ।
प्रायाद्देशं तज्जगीषोद्देशेनेव यदृच्छया ॥63॥

तद्राजा हयमुखपट्टिकां निरीक्ष्य
प्रभ्राजद्धनुरनिवार्यशौर्यधुर्याः ।
तं वेगाज्जगृहुरय प्रतप्तपिण्डं
चेलान्तर्ग्रथनरता इवातिमूढः ॥64॥

चण्डप्रचण्डसमराङ्गणचक्रवर्ती
तेजःप्रसारपरिभूतविरोधिकीर्तिः ।

 In Public domain. Digitization Muthulakshmi Research Academy

शौर्योष्मणा ग्लपयितुं युधि पल्लवांस्तान्
राज्ञस्समारभत गौतमिपुत्र भूपः ॥65॥

गद्यम् - एवं युद्धं कृतवति सति - ॥66॥

तत्सैन्यैर्मर्दितास्तेन पुना राज्ये नियोजिताः ।
रूढिमापुः पदत्राणोल्लीढधान्याकबीजवत् ॥67॥

गद्यम् - ततश्च, ॥68॥

स यागतुरगतुरगस्त्वरागमनयुक्
न्यवर्तत पथस्स्वधान्यकटकम् ।
निजानुगचमूप्रजाबिभुयुतो
दिशान्तनिचयप्रसाधितजयः ॥69॥

गद्यम् - तत्रागत्य धान्यकटकनगरीं बहिस्सुमलतानिकुञ्जपुञ्जीकृतरमणीय विमलशाद्वलस्थलसीम्नि कोमलश्यामलघासघ्रासास्वादकर्मणि सवनार्वणि, ॥70॥

चारैर्निशम्य सवनाश्वचमूसमेतं
आयान्तमान्ध्रनृपतिं सचिवास्सपौराः ।
प्रत्युद्गता नगरगोपुरमास्थितास्ते
तौर्यत्रिकैर्युवतिमङ्गलदीपिकाभिः ॥71॥

गद्यम् - ततो गौतमीपुत्रमहीपतिः पुरोहितमन्त्रिमुखादीन् निखिलराज्योद्योगिनो राजबन्धून् सकलसामन्तानाप्तांश्च क्रमेण नमस्कारदरहासहस्तावलम्बनकर-चालनालिङ्गनादिभिस्सम्भाव्य वर्षीयसीभिः सुवासिनीभिर्दत्तकर्पूररजोनीराजनो विप्रस्वस्तिवाचनपूर्वकं शिबिकामधिरुह्य मङ्गलवाद्यसङ्गतसवनाश्वपुरस्सरस्सन्,

पुरवीथिकायां पौरस्त्रीकटाक्षकिरणांकुरदत्ताभिनवनीराजनो जनसम्मर्दकलकल स्वनासादं मणिफलकप्रतिबिम्बितलक्ष्मीकटाक्षप्रसादं राजप्रासादमाससाद ॥72

गद्यम् - तत्र कञ्चित्समयं विश्रम्य, मध्याह्नसमयसूचकशंखध्वनि-माकर्ण्य सचिवादीन् निजनिवेशान् प्रेषयित्वा स्वयं चाभ्यन्तरनगरमगात्, ॥73॥

ततः परस्मिन्दिवसे निशान्ते विधाय कृत्यानि विभुर्निशान्ते ।
कार्येऽश्वमेधाचरणानिशान्ते निधाय भावं हृदये निशान्ते ॥74॥

गद्यम् - अरुणोदयेऽरुणकिरणाभ्युदये कार्यसचित्रमानीय तेन पुरोधसो मुखाद्बहुलर्त्विजः आह्वापयित्वा कृष्णातरङ्गरङ्गचटनिकटकुडु ङ्गसङ्गकुसुम गन्धोत्कटोर्व्यां यज्ञवाटीं यथाविधि निर्मापयित्वा ऋत्विक्परिवृतो नानादेशागतसंकुलीभूतबहुलमहाजनसमक्षं वेदनादमेदुरां परिसरमेदिनीं प्रकुर्वन् अश्वमेधयागाचरणायारभत । तदानीं तु, ॥75॥

कृष्णातरङ्गपरिशीतलशीकराञ्च-
तृष्णापहारिसरसीरुहगन्धवाहाः ।
सम्मार्जका मखभुवो बहुलर्त्विजां च
जता नृपालननियन्त्रितवीजकाश्च ॥76॥

यागसन्तर्पणानीतधान्यराशिवृते पुरे ।
तद्धान्यकटकं नाम सार्थकं नितरामभूत् ॥77॥

गद्यम् - तत्र यातायातजनानां तु - ॥78॥

विश्वेशो गौतमीपुत्रो विशालाक्षी व तत्सती ।
काश्यभूद्धान्यकटकमन्नसन्तर्पणे क्रतौ ॥78॥

 In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् - तत्र धान्यकटकमहानगरे सवनशालायामाज्यहोमचिटपटायितवीति होत्रनीलकेशशिखायितहविर्गन्धिलधूमपटलपटलक्षितनवाम्बुदागमायितगभीर नभोन्तराले, बहुश्रुतिबहुश्रुतऋत्विग्विततिविततदेवताह्वानरूपश्रुतिवाक्यप्लुतप्रति श्रुद्विगुणीकृतसवनसमयसमानीतसमुन्नतकपिलधेनुजातां भारवाकीर्णकुसुम कान्तारवाटिकान्तरयज्ञवाटिके वेदनिकरव्याकरणतर्कमुखनिखिलविद्याविषय परीक्षणाधिगतविजयद्विजनिचयविधृतैनपालदत्तबहुमान पुरस्सरमहार्हरत्न कम्बलैश्चित्रवर्णीकृतसत्सदस्यसभाविभागाभोगशोभाभासुरे यज्ञनारायणनामां-कितोच्चावचरागरञ्जितगीतिकारीतिकल्पितसभाजनप्रीतिरसैर्गायकसार्वभौमैः कृतसङ्गीतसारस्ये सवनकर्मणि सम्पूर्णे, ॥80॥

दक्षिणाः प्रददौ योग्याः प्रदक्षिणनमोविधिः ।
दक्षिणस्सर्वदानेषु विप्रेभ्यो गौतमीसुतः ॥81॥

गद्यम् - एवं स्थिरयशोविभवस्स विभुस्सवनं समाप्य सर्वदेवतानुग्रहं सम्प्राप्य, प्रजारक्षणददक्षिणेनक्षिणभुजारकन्देन सकलक्षितिं परिरक्षन्, कतिपयवर्षेषु व्यतीतेषु दक्षिणदिग्विजययात्रां च कृत्वा स्वदेशमनुप्राप्य कुशलेनास ॥82॥

त्रिसमुद्रपीतसत्त्वः वसुमुद्रारच्यमानदानाढ्यः ।
एकब्राह्मणबिरुदश्रीको ब्राह्मीपुमाकृतिश्लोकः ॥83॥

बहुविप्रकुटुम्बपोषको महिसीमन्तवतीमनोहरः ।
महितस्थिरकीर्तिचन्द्रिका तुहिनांशुस्सहकारमाधवः ॥84॥

विद्वान् कविः पण्डितपक्षपाती महागुणो लोकनुतैकवीरः ।
पवित्रवेदोक्तपथानुगस्स प्रभुर्बभौ गौतमिपुत्ररत्नम् ॥85॥

अभुनग्भूमिभुक्सैष भुवमेवं प्रजाहितः ।
एकविंशतिवर्षाणि निराटङ्कमकण्टकम् ॥86॥

In Public domain. Digitization Muthulakshmi Research Academy

भवतीं भवतीव्रतादिनीं भवपत्नीं भवनाशिनीं शिवाम् ।
भवनीकृतभक्तमानसां भविकश्रीकरवैभवां भजे ॥87॥

इति श्रीमदुभयभाषासनाथ द्विभाषि सोमनाथकृतौ
राजरत्नमालायां षष्ठं रत्नम् ।

****

 In Public domain. Digitization Muthulakshmi Research Academy

सप्तमं रत्नम्

श्री कामेश्वर्यै नमः।

द्विभाषि सोमनाथकृता श्री राजरत्नमालाचम्पूः

कामेश्वरीं मातृदेवीं मालतीमालिकावतीम् ।
मनोन्मनीमहं वन्दे मुनीण्मानसहंसिकाम् ॥1॥

गद्यम् - अथ च, ॥2॥

शम्भोस्तु श्रीमहाराज्यां कुमार इव शक्तिमान् ।
तस्य राज्ञो महाराज्यां पुलोमेति सुतोऽजनि (ऽभवत्) ॥3॥

वसन्तमम्बा करपल्लवान्तः प्रवर्धमानं च कुमारचन्द्रम् ।
रतिं ददानं नितरां जनानामाहुश्च तं मन्मथमोक्ष्य नार्यः ॥4॥

क्रमेण गुरुभिर्लब्धसर्वशास्त्रविशारदः ।
विशांरमणपुत्रोऽसावभूच्च रणकोविदः ॥5॥

स धनुष्कलया महेन्द्रसूनुः श्रितरक्षाकरणे महेन्द्रसूनुः ।
निगमेषु सरस्वती कलत्रो बहुदानैश्च सरस्वतीकलत्रः ॥6॥

पुलोमा बहुदुर्मानिकुलनागाहितुण्डिकः ।
बाल्य एवास कीर्त्याभाजितेन्द्रहयतुण्डिकः ॥7॥

स्वपितुर्नियतेर्द्विषां विधातुस्स्वपितुः प्राप्य स राट्कुमारः ।
पितृणा विदुषां पुष्पितां प्राक् श्रियमञ्चत्फलवर्णितां चकार ॥8॥

बहुकृतिरमणो बहूकृतीनां
करणं सर्वकलासु पण्डितानाम् ।

In Public domain. Digitization Muthulakshmi Research Academy

विहरणकुशलस्स धर्ममार्गे
विहरणकार्यपि सर्वदुष्कृतानाम् ॥9॥

गद्यम् - एवं स्वराज्यं पालयन् निजास्थाने तु,॥10॥

न्याये बाधान्तविद्वर्यैस्तुशब्दाकरमूर्तिभिः ।
अलंकुर्वन्निजास्थानं राज्यस्थानं रराज सः ॥11॥

स चापि पितृवद्वेदचोदितैर्बहुभिर्मुखैः ।
ततान मखवत्तृप्तिं मखवद्भोगभाङ्मखी ॥12॥

निजराज्यजनं यथाक्षिपक्ष्म प्रचुरप्रेमरसेन गोपयन्सः ।
प्रतिकक्षिदलैर्यथा न भीतिः परिपश्यंश्च तथा सहस्रनेत्रः ॥13॥

गद्यम् - एकस्मिन् समये तु,- ॥14॥

पितृजितशकराज्यरमामाक्रमितुं शकपतिं समायान्तम् ।
श्रुत्वा सीम्नश्चक्रे सेनाख्यसजीवकांश्यदृढवप्रम् ॥15॥

गद्यम् - चमसमूहसमेतस्स रिपुराट् "चस्तनु" नामा शकाधिपतिः कनिष्कनाम्ना कुषानुसार्वभौमेन प्रेरितस्सन्,॥16॥

उदधेर्जझामारुतवशगो नौरिव महान् जवादन्तः ।
निबिडबलबलिष्ठं तत्त्रिलिङ्गसैन्यं विवेश गम्भीरम् ॥17॥

गद्यम् - एवं तस्मिन् प्रविष्टे ततः किं भवेत्, तदेवाऽसीत् । ततश्च, ॥18॥

एवं पराजितस्सन् निवृत्य पश्चात् पलायित इवैषः ।
गत्वा गत्वा सैन्यैर्मध्येमार्गं वनान्तरनिगूढः ॥19॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् - स्वराज्यसम्पादनाय समयं प्रतीक्षमाणः कानिचिद्वर्षाणि तत्रैव तस्थौ । अत्र पुलोमाविशातकर्णिस्तु - ॥20॥

अष्टाविंशतिवत्सरपरिमितनिजपालनं विरम्य मनाक् ।
राज्ये तु **शातकर्णिनमनुजं** संस्थाप्य मनुजनेन्द्रसमः ॥21॥

गद्यम् - तपोवनगमनोन्मुखं मनस्तस्मिन् कुर्वति सति, ॥22॥

कुटिलक्रूराहिरिव श्रुतिदूर "श्वस्तन" श्शकाधिपतिः ।
कस्मिंश्चिदर्धरात्रे बहुबलकलितः कनिष्कदत्तबलैः ॥23॥

कबलीकृतवानथ शकमगधोर्व्यौ पौष्करादिसौराट्रम् ।
त्वरिततरमेकदैव हि हठात्तरां सम्प्रतार्य शातविभुम् ॥24॥

गद्यम् - ततश्च, ॥25॥

दुष्टप्रकृतिमीक्ष्यारि प्रकृतं च विचिन्तयन् ।
प्रकृतिव्रजमानीय शातकर्णिं निरूपयन् ॥26॥

गद्यम् - पुलोमाविरेवमभाषत, ॥27॥

यथाकथञ्चिद्देशस्स्वो रक्ष्यतां हन्यतामरिः ।
महच्च देशमातृणं मुच्यतां पच्यतां यशः ॥28॥

गद्यम्-इत्युक्त्वा यथाकुलपद्धति, तपोधनशरण्यमरण्यमयासीत् 29॥

ब्रह्मस्वरूपां कामेशीं ब्रह्माणीं भावयाम्यहम् ।
मत्काव्यरत्नजातान्तर्भाषारूपां बुधार्चिताम् ॥30॥

इति श्रीमदुभयभाषासनाथ द्विभाषि सोमनाथकृतौ
राजरत्नमालायां सप्तमं रत्नम् ।

****

In Public domain. Digitization Muthulakshmi Research Academy

अष्टमं रत्नम्

श्री कामेश्वर्यै नमः ।

द्विभाषि सोमनाथकृता श्री राजरत्नमालाचम्पूः

गायत्रीं परदेवीं गायन्तीभिश्च लक्षितां श्रुतिभिः ।
स्फायद्दोपितकिरणश्रीयुक्तां भावयामि कामेशीम् ॥1॥

शात कर्णिरधिगम्य वैभवैरान्ध्रराज्यरमणीयपीठिकाम् ।
शातकर्णकठिनारिपौरुषं तद्रुषा शमयितुं मनो दधौ ॥2॥

गद्यम् - एकदैकान्ततया प्रकृतिमण्डलमानीय वैरिविकृतकृतिखण्डनसमाचारे समुचितं समालोचनमाचचार ॥3॥

एकैकं हन्मो वयमुतैकदा सर्वविद्विषो हन्मः ।
इति चिन्तयन् प्रधानैरेकेनैवं प्रबोधितस्तेषु ॥4॥

एकेनैकेन चेद्युद्धं मिलिष्यन्त्यवशेषिणः ।
एकत्र शत्रुभिस्सर्वैर्योद्धुं नश्चापि दुष्करम् ॥5॥

तस्माद्विभज्य प्रबलानि सेनादलानि योग्यानि पृथक्पथज्ञः ।
प्रेष्याणि सेनापतिमेकमेकं नियुज्य तेषु द्विषतां परेद्युः ॥6॥

मूलबलैरधिकबलैरधिकदलैरात्मपट्टणेऽस्माभिः ।
स्थातव्यमरिनिरोधनसाधनसम्पत्तिपत्तिनिकरैश्च ॥7॥

इति सम्मन्त्रितं कार्यं मन्त्रिणा तेन तद्धितम् ।
सर्वानुमतमाकर्ण्य शातकर्णिर्महारथी ॥8॥

In Public domain. Digitization Muthulakshmi Research Academy

अश्मक कुकुरावन्तीन, पुष्करसौराष्ट्र नामकान् देशान् ।
सोऽप्रेषयत्स्वसेनाः चतुस्समुद्रानिवोल्बणाद्दृश्यान् ॥9॥

गद्यम् - तदजानन्नेव तस्मिन् समये "खुषानुराजश्चस्तनु"स्स्वीयं तनूजं जयदामनामानं तद्राज्ये नियुज्य स्वयमपि तस्य रक्षकस्सन्नास ॥10॥

सेनास्तास्त्रैलिङ्गीर्वैदर्भीर्मौलकीश्च कालिङ्गीः ।
चत्वारश्चान्ध्रविभोरभिययुरभियाति पट्टणांश्चतुराः ॥11॥

गद्यम् - ततः खुषानुभूपराजधानीं विनान्यरिपुराजधानीनगर्यस्त्रयोऽपि शातकर्णिसैन्यैस्त्वरिततरमाक्रान्ता बभूवुः, खुषानुराजनगरे तु, ॥12॥

पराक्रमसमुद्दामो जयदामाऽस्य नन्दनः।
युवराट् रुद्रदामा च चक्रातेऽत्युल्बणं रणम्॥13॥

गद्यम् - एवं प्रवृत्ते बहुवासरे रणकर्मणि शातकर्णिस्तत्र गत्वा,॥14॥

बलवद्बलनिस्तलान्ध्रराडरिदुर्वारविशालविक्रमः।
समराङ्गणनव्यविक्रमस्सहसोज्जृम्भनिरंकुशक्रमः ॥15॥

रथादुत्प्लुत्य तस्यारेस्सारथिं निशितासिना ।
हत्वासिना च तेनैव जयदामशिरोऽच्छिनत् ॥16॥

गद्यम् - एवं तं संहृत्य तदीयनन्दनस्यन्दिने रुषा निष्पन्दिनीर्दृष्टीः प्रसार्य तदभिमुखं गच्छति सति, ॥17॥

एतद्वृत्तान्तमाकर्ण्य चस्तनुर्वृद्धभूपतिः ।
सहसागत्य तत्पौत्रमुपादाय रणस्थितम् ॥18॥

In Public domain. Digitization Muthulakshmi Research Academy

शातकर्णिपदद्वन्द्वे नमस्कृत्य न्यपातयत् ।
रक्ष्यतां वंशवृक्षो मे त्वयेति करुणं वदन् ॥19॥

दण्डप्रणामेन हि दासदोषो निवर्तते खल्विति वाक्यरीत्या ।
तं रुद्रदामानमपास्तरोषस्स शातकर्ण्यक्षमतार्द्रचित्तः ॥20॥

गद्यम् - चस्तनुस्तदनन्तरं शातकर्णिप्रीत्युत्पादनाय तस्मै रुद्रदामसुतां सौन्दर्यवतीं शुभेऽहन्युद्वाहयाञ्चकार ।21॥

स्त्रिया जयश्रिया अपि वयोवत्या यशोढ्यया ।
रयादयं समाश्लिष्टस्स्वपुरीमाययौ प्रियात् ॥22॥

आगत्य धान्यकटकं स महीशचन्द्र-
स्त्यागेन नित्यपरिवर्धितसागरेन्द्रः ।
आस्थानपोषित महाबुधसत्कवीन्द्रः
पृथ्वीमरञ्जयदुदारयशोंऽशुचन्द्रः ॥23॥

बान्धव्यबन्धनतया स तु रुद्रदामा
भद्रं प्रपद्य निजराज्यपदे नियुज्य ।
आन्ध्रेण लब्धविभवोऽपि पुनश्च तस्मिन्
गूढं विरोधवृतमानस एव तस्थौ ॥24॥

गद्यम् - तत्र शातवाहनवंशोद्वहोऽपि, ॥25॥

चतुररणकलाकलापचापश्च तरणपूर्वकशातकर्णिभूपः ।
वितरण विनिवारितार्थिलोपस्स तु गुणजातपरीमलानवाप ॥26॥

गद्यम् - एवं महनीयमहिमा महामहस्सन् स्वमहामहीमुद्वहन् त्रिलिङ्गमही सीमन्तिनीकटके धान्यकटके, ॥27॥

In Public domain. Digitization Muthulakshmi Research Academy

महाध्वरं विंशतियुग्मवासरं
श्रुतिश्रुतं श्रौतविदग्रणीरितम् ।
चिकीर्षितश्शातविभुर्महाजनै-
र्युतं कृतात्विज्यमनेकसद्विजैः ॥28॥

गद्यम् - शुभेऽहनि सर्वैराप्तवर्गैरालोच्य, ॥29॥

त्रिलिंग्यराजपरिरक्षणधूर्वहत्वं
निक्षिप्य मुख्यसचिवे विजितान्यदेशान् ।
द्रष्टुं करादिहरणे श्वशुरस्य तस्य
निक्षिप्य मूर्ध्नि च धुरं स तु रुद्रदाम्नः ॥30॥

गद्यम् - तदुपर्यैककण्ठप्रकटितजनोत्कण्ठस्सुमसमुल्लसितोद्यानवनलतावकुण्ठे नगरोपकण्ठे मृदुलमृदुलोल्लसत्पवनपरिकल्पितसरस्सरोजमालिकाधूलिका विलुण्ठने पक्ष्मलितपरीमललक्ष्मीसमुत्क्षिप्तनन्दने वनेन्दिरासम्भृतसन्तत सोल्लुण्ठने तद्ज्ञनिर्मितयज्ञवाटिकायां सङ्कल्पित सवनकर्म कर्तुं कस्मिंश्चित्प्रभाते समारभत ॥31॥

एवमत्र सवने बहुश्रुतैश्श्रौतिभिर्बहुमुखं प्रचालिते ।
दीक्षिते च नृपतौ सतीयुतश्शिक्षिते विधिवदर्त्विजां शतैः ॥32॥

गद्यम् - तत्र रुद्रदामपुरमुपरोद्धुं यौधेयवंश्यरिपुभूपतयस्सेनाभिर्बहिः पुरं परिवेष्ट्य, भीकरनादबन्धुरं समरदुन्दुभिं रासयामासु ; अथ च, ॥33॥

यज्ञदीक्षितमुदीक्ष्य दुष्टधीः रुद्रदामनृपतिः क्षितीश्वरम् ।
आततै रिपुनृपालकैर्मिथस्सन्धिकार्यमकरोन्निजोचितम् ॥34॥

In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् - तैरेवं सन्दधन् परिशिष्टान् शातकर्णिरिपून् कुकुराकरावन्तिसौराष्ट्र भूपालानाह्वापयित्वा तैस्सह कृत्वा यौधेयेभ्यः स्वराज्ये भागं दत्वा तैस्तैरपि स्वस्वराज्येषु भगांस्तेभ्यो दापयित्वा च तरणशातकर्णिभूपतये स्वस्वराज्य स्वातन्त्र्याणि विश्वासराहित्येन प्रकटीचकार ॥35॥

समाप्य यागमाभोगं कृतावभृधसेचनः ।
दक्षिणास्सकलर्त्विभ्यो प्रदायाऽप्रेषयत्ततः ॥36॥

गद्यम् - चारमुखादरिदुराचारं शातकर्णिराकर्ण्य स्वयं सुदीर्घमालोच्य रुद्रदामकृतद्रोहं जानन्नपि कृतघ्नताम् ।

मत्वा श्वशुर इत्यन्तस्तृष्णीमास कृपामतिः।

स राजा प्रजारञ्जने स्वेन तुलितोऽन्यभूपो न को पीत्यभिष्टूयमानस्सन्ने-कोनविंशतिवर्षपरिमितं राज्यमकरोत् ॥37॥

आर्यावर्तसमार्ये कामेश्वरि ते समर्पितं भक्त्या।
अष्टमरत्नमिदं तव हृदयङ्गममस्तु कान्तिमद्देवि ! ॥38॥

इति श्रीमदुभयभाषासनाथद्विभाषि सोमनाथकृतौ
राजरत्नमालायाम् अष्टमं रत्नम् ।

****

In Public domain. Digitization Muthulakshmi Research Academy

नवमं रत्नम्

श्री कामेश्वर्यै नमः ।

द्विभाषि सोमनाथकृता श्री राजरत्नमालाचम्पूः

नवमं नवमञ्जुभाषणे कुरु रत्नं शुभपूर्तिमत्कृतम्।
अतिलोकमहत्वभाविते सति कामेश्वरि वंशदेवते॥1॥

गद्यम् - अथ तु, ॥2॥

शिवश्रीमहीङ्गन्द्रमा भद्रपीठं भुवश्श्रेयसे कल्पमनोध्युवास।
दिगन्ते स्फुरन्ती यशश्चन्द्रिका च द्विषच्चक्रसन्तापदायिन्युवास॥3॥

चतुस्समुद्रावृतभूमिभागं पञ्चायुधांशप्रभवस्स भूपः।
षडाननाभप्रचुरैकशक्तिस्सप्ताब्दकालं विततान राज्यम्॥4॥

अथ च प्रबभूव तद्विभोरभिभूतारिजनस्सुभाजनः।
विभवेन महेन्द्रसन्निभस्स **शिवस्कन्द**महीन्द्रचन्द्रमाः॥5॥

स कुलान्यनुपालयन् गुणैर्धवलश्शोणरुचिश्च तेजसा ।
यशसाप्यरुणोऽन्तरे बहिर्बहुवर्णाश्रयतामदर्शयत् ॥6॥

गद्यम् - तस्य राज्ञ एकः पुत्रस्सम्बभूव, स च नाम्ना, ॥7॥

गौतमीपुत्र**यज्ञश्रीशातकर्णी**त्युदीरितः।
बभूवात्मभुवस्सम्यक् प्रतिमान् प्रतिभावशात्॥8॥

गद्यम् - कुमारवतंसो गौतमीपुत्रयज्ञश्रीशान्तकर्णी समधीतसकलागमश्रुति स्मृतिकलाकलापस्सन् यौवनं प्राप्य॥9॥

स पितुर्महिभामिनीकर ग्रहणाञ्चत्समये तया कृतम् ।
नवसाप्तपदीनमाप तद्धृतसप्ताब्धिपतित्वसूचकम् ॥10॥

स वंशकर्ता सकलारिजातेश्श्रियश्च हर्ता सुयशोविहर्ता ।
बुधोपकर्ता कुजनप्रहर्ता महीं विधत्ते स्म भुजैकशक्त्या॥11॥

गद्यम् - स यशःप्रभविष्णुविष्णुदेवांशसम्भवः प्रभुर्भुवमभिरक्षन्, ॥12॥

स्वपूर्वपूर्वैर्विजयोपलब्धास्स्वपूर्वराजैरपि विप्रलब्धाः ।
अवन्तिमुख्येतरराज्यलक्ष्मीः पुनर्विजेतुं हृदयादलक्षीत् ॥13॥

चमूस्सर्वास्समीचीनं समीकृत्वा चमूपयुक्।
दिशां जयाय प्रययौ यज्ञश्रीगोतमीसुतः ॥14॥

आदौ यात्रामहाभेरी प्रतिदध्वान भूपतेः ।
उज्जयिन्यां विशेषेण शकस्य हृदि तत्पतेः ॥15॥

गद्यम् - ततश्शातकर्णिसेनावेष्टितायां जवादुज्जयिन्यां, ॥16॥

शाला आयुधसम्पूर्णा निर्भग्ना आन्ध्रसैनिकैः ।
विशाला च पुरी साऽभूदन्वर्था शकपालिता॥17॥

गद्यम् - तदन्वपि, ॥18॥

गौतमीपुत्रयज्ञश्रीभीत्या विकलितश्शकः ।
तथापीर्ष्यावमानाभ्यां प्रेरितो रणमाययौ ॥19॥

पूर्ववैरकृतोद्रेकौ शकराट् शातकर्णिनौ।
उपचक्रमतुर्योद्धुं द्रुपदद्रोणसन्निभौ ॥20॥

 In Public domain. Digitization Muthulakshmi Research Academy

कुम्भद्रौणशरासारान्निर्भग्नमिव तन्नभः।
स्वेष्विवापतितं तत्र सैन्यैर्दृष्टं तयोर्भयात्॥21॥

शराभिवर्षेण शराभिवर्षः कृपाणघातैश्च कृपाणघाताः।
वज्रेण वज्रं तु विभिद्यते खल्वितीव तद्घोररणे निरस्तः ॥22॥

एवमत्र चलिते महोल्बणे तद्गणे क्वणितसिञ्जिनीगणे ।
उच्चलन् सपदि शातकर्णिराट् तं शकं मशक इत्यपातयत् ॥23॥

जयलक्ष्मीसमाश्लिष्टवक्षा आन्ध्रशिखामणिः ।
प्रपेदेऽभ्युदयं नव्यं सबान्धवकुटुम्बकम् ॥24॥

गद्यम् - ततश्च, ॥25॥

यज्ञश्रीस्सद्य एवैकं निजप्रतिनिधिं सुधीः ।
उज्जयिन्यां तु संस्थाप्य ययौ दक्षिणकोसलान्॥26॥

जयश्रिया समिद्यज्ञदीक्षितोऽसकृदीक्षितः ।
वेगादवेदयद् दूतैस्स्वागमं तस्य भूपतेः ॥27॥

गद्यम् - सोऽपि तत्सर्वं पूर्वमेव विदित्वा, ॥28॥

दुरदर्शी स भूजानिश्श्रुत्वान्ध्रेशमहाबलम् ।
सन्धिसन्धायको भूत्वा तेन मैत्रीमपद्यत ॥29॥

गद्यम् - ततश्शातकर्णी तस्मात्प्रतिवत्सरग्रहणाधिकारं गृहीत्वा तमेव तत्र राजनं कृत्वा तद्राष्ट्रात्प्रस्थाय सौराष्ट्रादीनभिययौ । अथ च, ॥30॥

प्रबलेन बलेन पार्थिवः प्रभवद्भूरिभुजाबलेन च ।
श्रितदैवबलेन पूरितो लघुसौराष्ट्रमुखा भुवोऽग्रहीत् ॥31॥

गद्यम् - एवं सुसम्पादितविजयमुद्रासमुद्रस्सत्यसङ्गररङ्गरङ्गत्प्रतापपवित्रो गौतमीपुत्रो यज्ञश्रीशातकर्णी स्वदेशमागत्य, ॥32॥

अविहाय विहायसोल्लसद्गुणवल्लीपरिपुष्पितश्रियम् ।
अकरोदकलङ्कपालनं शरदो विंशतिवन्नवोत्तराः ॥33॥

कीर्तिश्रीगन्धचर्चाविलसितबहुदिक्कूटकोटीरवाटी-
सौरभ्यश्रीप्रपूर्णत्रिदशनगरभूवीथिकासौधकोटिः ।
कूष्माण्डस्थूलमुक्ताफलमतुलितमप्यात्मवंशोद्भवानां
यज्ञश्रीशातकर्णी गुणमणिरभवद्गौतमीपुत्रपूर्वः ॥34॥

गद्यम् - स वर्धिष्णुर्वैदिकमतसञ्जातोऽपि परमतसहिष्णुस्स्वराज्ये सर्वतोभद्रं सम्पादयन्नपरसमन्तभद्रं बौद्धमतवाङ्मयायुर्वेदप्रचारकलासमुपार्जन-माचार्य नागार्जुनं वैदिकमताचार्यैस्समं निजसभायां सभाजयन् श्रीपर्वते तस्मै संघारामं निर्मापयित्वा तत्र तं संस्थाप्य ततस्सुहृल्लेखादिभिस्तत्क्षेममभिजानंस्तं बहु बहुमानितवान् बभूव, ॥35॥

अथ तस्य महीजानेः प्रबभूव गुणोत्तरः ।
तनयो विजयाभिख्यस्सनयः प्रजया नुतः ॥36॥

गद्यम् - अथापि, ॥37॥

संग्रामलब्धविजयो विजयो विजयोपमः ।
अजेयतेजा अकरोद्राज्यं षड्वर्षसम्मितम् ॥38॥

तस्य राजन्यमूर्धन्यधन्यस्याऽन्वयदीपनः ।
चन्द्रश्रीर्व्याप्तसत्कीर्तिचन्द्रश्रीस्तनयोऽभवत् ॥39॥

 In Public domain. Digitization Muthulakshmi Research Academy

गद्यम् - स भूपोऽपि दशशरत्परीतनिजराज्यं परीमलीकृत्य बहुयागकर्ता धर्मविहर्ता बभूव । ॥40॥

तस्य पुत्रः **पुलोमावी** वश्यो मित्रसुधीसताम् ।
साम्राज्यमभुनक्साज्यं सप्तवत्सरसम्मितम् ॥41॥

गद्यम् - एवं त्रिंशच्छातवाहनराजन्या जितारातिजन्या धर्मगुणधन्यास्सन्त स्सन्तः, ॥42॥

ते पञ्चषष्ठिसहितत्रिशतीसमास्तु
भ्राजिष्णुराज्यविभवाननुभूय भूयः ।
भूयांस उन्मिषदुदञ्चितकीर्तिजाता-
श्रीशातवाहननृपाश्शकपा अभवन् ॥43॥

भक्त्या समर्पिता ते मद्रचिता राजरत्नमालेयम् ।
कण्ठे मुदा दधस्व श्रीकामेश्वरि मदन्वयानुगते ॥44॥

मन्दोदञ्चितमन्दमन्दगमनां मञ्जुप्रभाराधितां
मन्दारस्त्रगुदारकुन्दसुमनोऽमन्दारविन्दश्रिया ।
बृन्दिष्ठां पृथुवेणिकां विदधतीं कामेश्वरीं भास्वरां
वन्देऽहं भुवनेश्वरीं शुभकरीं श्रीराजराजेश्वरीम् ॥45॥

इति श्रीमदुभयभाषासनाथ द्विभाषि सोमनाथकृतौ
राजरत्नमालायां नवमं रत्नम् ।
सर्वं सम्पूर्णम् ।
श्रीः श्रीः श्रीः ।
श्रीमत्कामेश्वरीपरदेवतासमर्पणमस्तु ।
ओम् शान्तिश्शान्तिश्शान्तिः ॥

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ISBN - 978-81-969575-9-9



द्विभाषि सोमनाथशास्त्रिप्रणीता

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2024